
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 714 विषय वैदिक

नाव. ऐतरेय आरण्यक (Mss)

लेखक/लिपीकार चिंतामणी दीक्षित भडकंबकर

पृष्ठ 48 काळ संवत 1844 पूर्ण/~~अपूर्ण~~

आ. कं.

१

॥ अथारण्यकांडप्रारंभः ॥

१

आर॰प्र॰

॥श्रीगणेशायनमः॥ ॥हरिः ॐ॥ ॥भूमिमुपस्पृश्य दग्नरवानमङ्गलानमऋषि
भ्योमंत्रकृद्भ्योमंत्रपतिभ्योनमोवोअस्तुदेवेभ्यःशिवानःशंतमाभवसुमृळीकासरस्वतिमाते
व्योमसंदृशि॥भद्रंकर्णेभिःशृणुयामदेवा० कृ॥शंनइंद्राग्नीभवतामवोभिः० कृ॥स्तुषेजनं

१

सुव्रतंनव्यसीभिः० कृ॥कयानश्चित्रआभुवत्० २॥स्योनापृथिविभव०॥
॥उदितःशुक्रियंदधे॥तमहमात्मनिदधे॥अनुमामैत्विंद्रियं॥मयिश्रीर्मयियशः॥सर्वः
सप्राणःसबलः॥उत्तिष्ठाम्यनुमाश्रीः॥उत्तिष्ठंत्वनुमायंतुदेवताः॥अदब्धंचक्षुरिषितं
मनः॥सूर्योज्योतिषांश्रेष्ठोदीक्षेमामाहिंसीः॥तच्चक्षुर्देवहितं० कृ॥त्वमग्नेव्रतपाअसि
० कृ॥वाङ्मेमनसिप्रतिष्ठितामनोमेवाचिप्रतिष्ठितमाविरावीर्मएधिवेदस्यमआणीस्थः
श्रुतंमेमाप्रहासीरनेनाधीतेन॥अहोरात्रान्संदधाम्यृतंवदिष्यामिसत्यंवदिष्यामितन्मा

मवतुतद्वक्तारमवत्ववतुमामवतुवक्तारमवतुवक्तारं॥ॐशांतिःशांतिःशांतिः॥पूर्वोत्तरशांतिः॥
॥ॐ॥ ॥अथमहाव्रतमिंद्रोवैवृत्रंहत्वामहानभवद्यन्महानभवत्तन्महाव्रतमभवत्तन्महाव्रत
स्यमहाव्रतत्वंद्वेएतस्याह्नआज्येकुर्यादितिहैकआहुरेकमितित्वेवस्थितंप्रवोदेवायाग्नयइतिरा
ड्ढिकामोविराड्विराड्वोअतिथिमितिपुष्टिकामःपुष्टिर्वैविराट्पुष्टिमान्भवतीत्यतिथिमितिपदंभ
वतिनेतत्कुर्यादित्याहुरीश्वरोऽतिथिरेवचरितोस्तदुहस्माहकुर्यादेवयोवैभवतियःश्रेष्ठतामश्नुते
सवाअतिथिर्भवतिनवाअसंतमातिथ्यायाद्रियंतेतदुस्मोकाममेवैतत्कुर्यात्त्वंयद्येतत्कुर्याद्दाग्
नमदृत्रहंतममित्येतंतृचंप्रथमंकुर्यादेतद्वाअहरिंद्रस्ततःसंवत्सरमासेततदागच्छंतितएनेनुष्टुप्
श्रीर्षाणस्ययस्त्वचाभवंतिब्रह्मवैगायत्रीवागनुष्टुप्ब्रह्मणैवतद्वाचंसंदधातित्वंनोअग्निःसमि
धाजनानामितिकीर्तिकामोहोताजनिष्टचेतनइतिप्रजापशुकामः॥१॥अग्निंनरोदीधितिभि

आर·प·

रण्योरिष्टन्नाद्यकामोग्निर्वा अन्नादश्चिरतरमिव वा इतरे षाज्ये षाग्निमागछं यथेह मुखत ए
वाग्निमागछंति मुखतोन्नाद्यमश्नुते मुखतः पाप्मानमपघ्नते हस्तच्युती जनयंते तिजातवेदे
तस्माद्धा अक्रीयजमानो जायते तस्माज्जातवत्तानि चत्वारि छंदांसि भवंति चतुष्पादा वै पशवः
२ पशूनामवरुध्यै तानि त्रीणि छंदांसि भवंति त्रयो वा इमे त्रिवृतो लोका एषामेव लोकानामभि
जित्यै ते द्वे छंदसी भवतः प्रतिष्ठाया एव द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमानमे
व तद्द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयंति ताः पराग्वचनेन पंचविंशतिर्भवंति पंच
विंशो यं पुरुषो दश हस्त्या अंगुलयो दश पाद्या द्वावूरू द्वौ बाहू आत्मा पंचविंशस्तमिमम २
त्मानं पंचविंशं संस्कुरुतेऽथो पंचविंशो वा एतदहः पंचविंश एतस्याह्नः स्तोमस्तत्समेन समं
प्रतिपद्येते तस्माद्द्वे एव पंचविंशतिर्भवंति तास्त्रिः प्रथमया त्रिरुत्तमयैकयानत्रिंशान्यूना

क्षरा विराण्न्यूनेनैव वै रेतः सिच्यते न्यूनेन प्राणान्न्यूनेनान्नाद्यं प्रतिष्ठितमेतेषां कामानामवरुध्या एता
न्कामानवरुंधे य एवं वेद ता अभिसंपद्यंते बृहतीं च विराजं च छंदो येतस्याह्नः संपत्तामथो अ
नुष्टुभमनुष्टुब्वा यतनानि स्वाज्यानि ॥२॥ गायत्रं प्रउगं कुर्यादित्याहुस्तेजो वै ब्रह्मवर्चसं गाय
त्री तेजस्वी ब्रह्मवर्चसी भवतीत्यौष्णिहं प्रउगं कुर्यादित्याहुरायुर्वा उष्णिगायुष्मान्भवतीत्यानु
ष्टुभं प्रउगं कुर्यादित्याहुः क्षत्रं वा अनुष्टुप्क्षत्रस्याप्त्या इति बार्हतं प्रउगं कुर्यादित्याहुः श्रीर्वै बृ
हती श्रीमान्भवतीति पांक्तं प्रउगं कुर्यादित्याहुरन्नं वै पंक्तिरन्नवान्भवतीति त्रैष्टुभं प्रउगं कुर्या
दित्याहुर्वीर्यं वै त्रिष्टुब्वीर्यवान्भवतीति जागतं प्रउगं कुर्यादित्याहुर्जागता वै पशवः पशुमान्भव
तीति तदु गायत्रमेव कुर्याद्ब्रह्म वै गायत्री ब्रह्मैतदहर्ब्रह्मणैव तद्ब्रह्म प्रतिपद्यंते तदु माधुछंदसं
मधु ह स्म वा ऋषिभ्यो मधुछंदाश्छंदति तन्मधुछंदसो मधुछंदस्त्वमथो अन्नं वै मधु सर्वं वै मधु

अ.र.प

३

सर्वे वै कामा मधुछंदसं शंसति सर्वेषां कामानामवरुध्यै सर्वान्कामानवरुंधे य एवं वेद
तदु हैकाहिकं रूपसमृद्धं बहु वा एतस्मिन्नहनि किंच किंच वारणं क्रियते शंस्या एवं शंसति वै प्रतिष्ठै
काहः शंस्यामेव तत्प्रतिष्ठायामंततः प्रतितिष्ठंति प्रतितिष्ठति य एवं वेद येषां चैवं विद्वानेतद्धोता
शंसति ॥ २ ॥ वायवायाहि दर्शतेमे सोमा अरंकृता इत्येतद्वा अहरहर्यजमानाय च देवेभ्यश्चारंकृत
स्मा एतदहर्भवति य एवं वेद येषां चैवं विद्वानेतद्धोता शंसतींद्रवायू इमे सुता आयातमुपनिष्कृत
मित्तिये वै निष्कृतं तत्संस्कृतमाहास्येंद्रवायू संस्कृतं गच्छतो य एवं वेद येषां चैवं विद्वानेतद्धोता शं
सति मित्रं हुवे पूतदक्षं धियं घृताचीं साधंतेति वाग्वै धीर्घृताची वाचमेवास्मिंस्तद्दधाति य एवं
वेद येषां चैवं विद्वानेतद्धोता शंसत्यश्विना यज्वरीरिष इत्यन्नं वा इषोऽन्नाद्यस्यावरुध्या आयातं रु
द्रवर्तनी इत्याहास्याश्विनौ यज्ञं गच्छतो य एवं वेद येषां चैवं विद्वानेतद्धोता शंसतींद्रायाहि चित्र

३

भानविंद्रायाहि धियेषित इंद्रायाहि तूतुजान इत्यायाह्यायाहीति शंसत्याहास्येंद्रो यज्ञं
गच्छति य एवं वेद येषां चैवं विद्वानेतद्धोता शंसत्योमासश्चर्षणीधृतो विश्वे देवास आगते
त्याहास्य विश्वे देवा हवं गच्छंति य एवं वेद येषां चैवं विद्वानेतद्धोता शंसति दाश्वांसो दाशुषः सु
तमिति यदाह ददुषो ददुषः सुतमित्येव तदाह ददति हास्मै तं कामं देवा यत्काम एतच्छंसति य एवं
वेद येषां चैवं विद्वानेतद्धोता शंसति पावका नः सरस्वती यज्ञं वष्टु धियावसुरिति वाग्वै धिया
वसुर्वाचमेवास्मिंस्तद्दधाति य एवं वेद येषां चैवं विद्वानेतद्धोता शंसति यज्ञं वष्टु इति यदाह यज्ञं
वहत्वित्येव तदाह ताः परागवचने नैकविंशतिर्भवंत्येकविंशो वै पुरुषो दश हस्त्या अंगुलयो दश
पाद्या आत्मैकविंशस्तमिममात्मानमेकविंशं संस्कुरुते ताः स्त्रिः प्रथमया त्रिरुत्तमया पंचविंश
तिर्भवंति पंचविंश आत्मा पंचविंशः प्रजापतिर्दश हस्त्या अंगुलयो दश पाद्या द्वावूरू द्वौ बाहू

अर॰प्र

४

आत्मैव पंचविंशस्तमिममात्मानं पंचविंशं संस्कुरुतेऽथो पंचविंशं वा एतदहः पंचविंश एत
दहः स्तोमस्तत्समेन समं प्रतिपद्यते तस्माद्वेव पंचविंशतिर्भवंति भवंति॥४॥ ॥इति प्र
थमारण्यके प्रथमोऽध्यायः॥१॥ ॥आ त्वा रथं यथोतय इदं वसो सुतमंध इति मरुत्वतीयस्य
प्रतिपदनुचरौ वैकाहिकौ रूपसमृद्धौ बह्वु वा एतस्मिन्नहनि किंच किंच वारुणं क्रियते शांत्या
एव शांतिर्वै प्रतिष्ठैकाहः शांत्यामेव तत्प्रतिष्ठायामंततः प्रतितिष्ठंति प्रतितिष्ठति य एवं वे
द येषां चैवं विद्वानेतद्धोता शंसतींद्र नेदीय एदिहि प्रसूतिरान्त्राच्चीभिर्यंत उक्थिन इ सुक्थं
वा एतदहरुक्थ्यवद्रूपसमृद्धमेतस्याह्नो रूपं प्रैतु ब्रह्मणस्पतिरक्षावीरमिति वीरवद्रूपस
मृद्धमेतस्याह्नो रूपमुत्तिष्ठ ब्रह्मणस्पते सुवीर्यमिति वीर्यवद्रूपसमृद्धमेतस्याह्नो रूपं
प्र नूनं ब्रह्मणस्पतिर्मंत्रं वदत्युक्थ्यमित्युक्थं वा एतदहरुक्थ्यवद्रूपसमृद्धमेतस्याह्नो रू

४

पमग्निर्नेता सवृत्रहेति वार्त्रघ्नमिंद्र रूपमैंद्रमेतदहरेतस्याह्नो रूपं त्वं सोम क्रतुभिः सुक्रतुर्भू
स्त्वं वृषा वृषत्वेभिर्महित्वेति वृषण्वद्वा इंद्रस्य रूपमैंद्रमेतदहरेतस्याह्नो रूपं पिन्वंत्यपोत्यं नमिहे
विनयंति वाजिनमिति वाजिमद्वा इंद्रस्य रूपमैंद्रमेतदहरेतस्याह्ना रूपमथो उत्सं दुहंति स्त
नयंतमक्षितमिति स्तनयद्वा इंद्रस्य रूपमैंद्रमेतदहरेतस्याह्नो रूपं प्र व इंद्राय बृहत इति
यद्वै बृहत्तन्महन्महद्द्रूपसमृद्धमेतस्याह्नो रूपं बृहदिंद्राय गायतेति यद्वै बृहत्तन्महन्मह
द्द्रूपसमृद्धमेतस्याह्नो रूपं नकिः सुदासो रथं पर्यास न रीरमदिति पर्यस्तवद्रूंतिमद्रूपस
मृद्धमेतस्याह्नो रूपं सर्वान्प्रगाथान्छंसति सर्वेषामह्नामाप्त्यै सर्वेषामुक्थानां सर्वेषां पृष्ठानां स
र्वेषां शस्त्राणां सर्वेषां प्रउगाणां सर्वेषां सवनानां॥५॥ असत्सु मे जरितः साभिवेगः सत्यध्व
मिति शंसति सत्यं वा एतदहः सत्यवद्रूपसमृद्धमेतस्याह्नो रूपं तदु वासुक्रं ब्रह्म वै वसुक्रो ब्रह्मै

अर॰ प्र॰

नदहर्ग्नेणैव तद्रूपं प्रतिपद्यते तदाहुरथ कस्माद्धा सूक्तेनैतन्मरुत्वतीयं प्रतिपद्यत इति न
ह वा एतदन्यो वा सूक्तान्मरुत्वतीयमुद्यच्छन्न विद्याच्चेति तस्माद्धा सूक्तेनैवैतन्मरुत्वतीयं
प्रतिपद्यते तदनिरुक्तं प्राजापत्यं शंसत्यनिरुक्तो वै प्रजापतिः प्रजापतेराप्त्यै स हूदिंद्र नि
तेनैंद्राद्रूपान्न प्रच्यवते पिबा सोममभि यमुग्र तर्द इति शंसत्यूर्वं गव्यं महि गृणान इंद्र इ
महद्वद्रूपसमृद्धमेतस्याह्नो रूपं तदु भारद्वाजं भरद्वाजो ह वा ऋषीणामनूचानतमो दीर्घ
जीवितमस्तपस्वितम आस स एतेन सूक्तेन पाप्मानमपाहत तद्यद्भारद्वाजं शंसति पाप्मनो
पहत्या अनूचानो दीर्घजीवी तपस्व्यसानीति तं भारद्वाजं शंसति कया शुभा सवयसः सनी
ळा इति शंसत्यानूका सते प्रति हर्यत्युक्थे उक्थे उक्थं वा एतदहरुक्थवद्रूपसमृद्धमेतस्याह्नो रूपं त
दु कयाशुभीयमेतद्धै संज्ञानं संतनि सूक्तं यत्कयाशुभीयमेतेन ह वा इंद्रोगस्त्यो मरुतस्ते सम

स्मा

जानत तद्यत्कयाशुभीयं शंसति संज्ञात्या एव तद्वायुष्यं तद्योस्य प्रियः स्यात्कुर्यादेवास्य क
याशुभीयं मरुत्वाँ इंद्र वृषभो रणायेति शंसतींद्र वृषभ इति वृषण्वद्वा इंद्रस्य रूपमैंद्रमेतदहरे
तस्याह्नो रूपं तदु वैश्वामित्रं विश्वस्य ह वै मित्रं विश्वामित्र आस विश्वं हास्मै मित्रं भवति य ए
वं वेद येषां चैवं विद्वानेतद्धोता शंसति जनिष्ठा उग्रः सहसे तुरायेति निविद्धानमैकाहिकं रू
पसमृद्धं वा एतस्मिन्नहनि किंच किंच वारुणं क्रियते शांत्या एव शांतिर्वै प्रतिष्ठैकाहः शां
त्यामेव तत्प्रतिष्ठायामंततः प्रतितिष्ठंति प्रतितिष्ठति य एवं वेद येषां चैवं विद्वानेतद्धोता शं
सति ताः पराग्वचनेन संपन्नवतिर्भवंति सा या नवतिस्तिस्रस्ताः स्त्रिंशिन्यो विराजोऽथ याः
सप्ताति यंति ये वै पाप्म शंसा सा स्य तस्या एव ताः स्त्रिः प्रथमया त्रिरुत्तमयैकत्रिंशं भवति पं
चांगुल यश्च तुष्पर्वा ह्येकक्षसी दोश्चाक्षश्चांसफलकं च सा पंचविंशातिः पंचविंशानीतराणि

अर॰प्र॰

६

त्वंगानि तच्छतमात्मैकशात तमोयकृतं तत्सयुरिंद्रियं वीर्यं तेजो यजमान एकशात तमर्क्त्रासुषी
द्रियेवीर्येतेजसि प्रतिष्ठितस्तास्त्रिष्टुभमभिसंपद्यंते त्रैष्टुभो हि मध्यंदिनः॥६॥ तदाहुः किं
प्रेंखस्य प्रेंखत्वमित्ययं वै प्रेंखो यो यं पवत एष ह्येषु लोकेषु प्रेंखत इति तत्प्रेंखस्य प्रेंखत्व
मेकं फलकं स्यादित्याहुरेकधा ह्येवायं वायुः पवतेऽस्य रूपेणेति तत्तन्नादृत्यं त्रीणि फलका
नि स्युरित्याहुस्त्रयो वा इमे त्रिवृतो लोका एषां रूपेणेति तत्तन्नादृत्यं द्वे एव स्यातां द्वौ वा इमौ
लोकाववद्धातमाविव दृश्येते य उ एने अंतरेणाकाशः सोंतरिक्षलोकस्तस्माद्द्वे एव स्यातामौ
दुंबरे स्यातामूर्ग्वा अन्नाद्यमुदुंबर ऊर्जोन्नाद्यस्यावरुध्यै मध्यत उद्धूते स्यातां मध्यतो वै
प्रजा अन्नं धिनोति मध्यत एव तदन्नाद्यस्य यजमानं दधाति स्कंभयोः रज्जुवो भवंति दक्षिणा
श्चसव्याश्च दक्षिणा वा एकेषां पश्चिमा रज्जवः सव्या एकेषां ते द्वे उभय्यो रज्जवो भवंत्स्कंभयेषां

घ

पश्चिमा मा द्व्येदाक्ष्यैः स्कंदं जीवा ओषधीनामपहतपाप्मा तस्माद्दार्भ्याः स्युः॥७॥ अरत्निमात्रउप
रिष्टमेः प्रेंखः स्यादित्याहुरेतावता वै स्वर्गा लोकाः संमिता इति तत्तन्नादृत्यं प्रादेशमात्रे स्या
दित्याहुरेतावता वै प्राणाः संमिता इति तत्तन्नादृत्यं मुष्टिमात्रे स्यादेतावता वै सर्वमन्नाद्यं
क्रियत एतावता सर्वमन्नाद्यमभिपन्नं तस्मान्मुष्टिमात्र एव स्यात्पुरस्तात्प्रत्यंचं प्रेंखमधि
रोहेदित्याहुरेतस्य रूपेण य एष तपति पुरस्ताद्ध्येष इमाँल्लोकान्प्रत्यङ्ङधिरोहतीति तत्तन्ना
दृत्यं तिर्यंचमधिरोहेदित्याहुस्तिर्यंचं वा अश्वमधिरोहंति तेनो सर्वान्कामानवाप्नवामेति न
तन्नादृत्यमन्वंचमधिरोहेदित्याहुरन्वंची वै नावमधिरोहंति नौर्वै एषा स्वर्ग्याणी यत्प्रेंखः इति
तस्मादन्वंचमेवाधिरोहेच्छुबुकेनोपस्पृत्योच्छुकोहेवं वृक्षमधिरोहति स उ वयसामन्नादतमः इति
तस्माच्छुबुकेनोपस्पृत्य बाहुभ्यामधिरोहेदेवं श्येनो वयांस्यभिनिविशत एवं वृक्षं स उ वयसां

अर॰प्र॰

७

वीर्यवत्तमइतितस्माद्बाहुभ्यामधिरोहेदस्यैपादंनोच्छिंद्यांनेदस्यैप्रतिष्ठायाउच्छिद्याइतिप्रेंखंहे
ताधिरोहत्यौदुंबरीमासंदीमुद्गातावृषावैप्रेंखोयोषासंदीतन्मिथुनंमिथुनमेवतदुक्थमु
खेकरोतिप्रजात्यैप्रजायतेप्रजयापशुभिर्यएवंवेदाथान्नंवैप्रेंखःश्रीरासंद्यन्नंचैवतच्छ्रि
यंचान्वधिरोहतोहसीहोत्रकाःसमधिरोहंतिसब्रह्मकाःसमुद्रस्यप्यवाओषधिवनस्पत
यःफलंगृह्णंतितद्यदेतस्मिन्नहनिसर्वग्राःसमधिरोहंतीषमेवतदूर्जमन्नाद्यमधिरोहंतसू
र्जेन्नाद्यस्यावरुंध्येवषट्कृत्यावरोहेदित्याहुस्तत्तन्नादृत्यमकृतावैसापचितिर्यामप्रत्य
तेकरोतिनिगत्स्यभक्षमवरोहेदित्याहुस्तत्तन्नादृत्यमकृतावैसापचितिर्यामध्यस्थायक
रोतिप्रतिख्यायभक्षमवरोहेदेषावाअपचितिर्यांप्रत्यपतेकरोतितस्मात्प्रतिख्यायैवभक्ष
मवरोहेत्प्राङवरोहेत्प्राग्वैदेवरेतसंप्रजायतेतस्मात्प्राङवरोहेदवरोहेत्॥८॥ ॥ ॥

॥ ॥इतिप्रथमारण्यकेद्वितीयोध्यायः॥ ॥हिंकारेणैतदहःप्रतिपद्येतेत्याहुर्ब्रह्मवैहिंकारो
ब्रह्मैतदहर्ब्रह्मणैवतद्ब्रह्मप्रतिपद्यतेयएवंवेदयदेवहिंकारेणप्रतिपद्यता३इ॥वृषावैहिंकारोयो
षर्क्तन्मिथुनंमिथुनमेवतदुक्थमुखेकरोतिप्रजात्यैप्रजायतेप्रजयापशुभिर्यएवंवेदयद्वेवहिं
कारेणप्रतिपद्यता३इ॥यथावाअग्निरेवंब्रह्मणोहिंकारोयद्वैकिंचाग्निर्याभितित्स्तत्स्यवै
नस्त्वणस्येवंयंकामंकामयतेहिंकारेणाभ्येवैनंत्सणत्तिमएवंवेदयद्वेवहिंकारेणप्रतिपद्यता३इ॥वा
चोवाएषाव्यावृत्तिर्दैव्यैचमानुष्यैचयद्धिंकारःसयद्धिंकृत्यप्रतिपद्यतेवाचमेवतद्व्यावर्त्तयतिदैवीं
चमानुषींच॥१॥तदाहुःकेतस्याह्नःप्रतिपदितिमनश्चवाक्चेतिब्रूयात्सर्वेन्यस्मिन्कामाःश्रिताःस
र्वानन्याकामान्दुहेमनसिवैसर्वेकामाःश्रितामनसाहिसर्वान्कामान्ध्यायतिसर्वेहास्मिन्कामाःश्र
यंतेयएवंवेदवाग्वैसर्वान्कामान्दुहेवाचाहिसर्वान्कामान्वदतिसर्वान्हास्मैकामान्वाग्दुहेयएवंवेदत

आर.ब्रा.

८

दाकुर्वीतदहर्ऋचानयजुषानसाम्नाप्रत्यक्षात्प्रतिपद्येतनर्चानयजुषानसाम्नइत्यादितितदेता
एवव्याहृतीःपुरस्ताज्जपेद्भूर्भुवःस्वरित्येतावावव्याहृतयइमेत्रयोवेदाभूरित्येवऋग्वेदोभु
वइतियजुर्वेदःस्वरितिसामवेदस्तन्नर्चानयजुषानसाम्नाप्रत्यक्षात्प्रतिपद्येतनर्चानयजु
षानसाम्नएति॥१०॥तदितिप्रतिपद्येततत्तदितिवाअन्नमन्नमेवतदभिप्रतिपद्यतएतांवाव
प्रजापतिःप्रथमांवाचंव्याहरदेकाक्षरद्व्यक्षरांततेतितातेतितथैवैतत्कुमारःप्रथमवादीवा
चंव्याहरत्येकाक्षरद्व्यक्षरांततेतितातेतितथैवतत्तनवत्यावाचाप्रतिपद्येततदुक्तमृषिणाबृहस्पते
प्रथमंवाचोअग्रमित्येतद्धैवप्रथमंवाचोअग्रंयत्प्रैरतनामधेयंदधानाइतिवाचाहिनामधेया
निधीमंतेयदेषांश्रेष्ठंयदरिप्रमासीदित्येतद्धैवश्रेष्ठंदरिप्रंप्रेणातदेषांनिहितंगुहाविरितीद
मुहगुहाध्यात्ममिमादेवताअदउआविरधिदैवतमित्येनत्तदुक्तंभवति॥११॥तदिदासभुवनेषु

मेत

८

ज्येष्ठमितिप्रतिपद्यतएतद्वावभुवनेषुज्येष्ठंयतोजज्ञउग्रस्त्वेषनृम्णइत्यतोह्येषजात
उग्रस्त्वेषनृम्णःसद्योजज्ञानोनिरिणातिशत्रूनितिसद्योह्येषजातःपाप्मानमपाहततोऽनु
यंविश्वेमदंत्यूमाइतिभूतानिवैविश्वऊमास्तएनमनुमदंत्यद्गादुदगादितिवावृधानःश
वसाभूर्योजाइत्येषवैवावृधानःशवसाभूर्योजाःशत्रुर्दासायभियसंदधातीतिसर्वंह्येत

ति

स्माद्बिभायाव्यनच्चव्यनच्चससस्नीयच्चप्राणियच्चाप्राणकमित्येवतदाहसंतेनवंतप्रभृताम
देष्वितितवसर्वंवशाइत्येवतदाहत्वेक्रतुमपिवृंजंतिविश्वइतित्वमीमानिसर्वाणिभूतानिस
र्वाणिमनांसिसर्वेक्रतवोपिवृंजंतीत्येवतदाहद्वियद्तेत्रिर्भवंत्यूमाइतिद्वौवैसंतौमिथुनौप्र
जायेतेप्रजात्यैप्रजायतेप्रजयापशुभिर्यएवंवेदस्वादोःस्वादीयःस्वादुनासृजासमितिमि
थुनंवैस्वादुप्रजास्वादुमिथुनेनैवतत्प्रजांसंसृजत्यदःसुमधुमधुनाभियोधीरितिमिथुनं

अ.र.प्र.

१

ति

वै मधु प्रजा मधु मिथुनेनैवैतत्प्रजामभिपुष्यन्ति तदु ह स्माहर्षिणा स्वांयत्तन्तूत्तन्वामेरयतेस
स्यां नूनारीर्यामिमांन्छंदोमयीमित्येवैतदाहाऽथो तन्तूरेवैतन्वो ऽरूपेषजभित्यस्यै नारी
र्यादृयं छंदोमयीत्येवैतदाह तस्यै यान्यष्टावक्षराणि सा गायत्री यान्येकादश सा त्रिष्टुब्या
नि द्वादश सा जगत्यथ यानि दश सा विराड् दशिन्येषु त्रिषु छंदःसु प्रतिष्ठिता पुरुषं इति न्य
क्षरं सउ विराड्ये तानि वाव सर्वाणि छंदांसि यान्येतानि विराट् चतुर्थान्येव मुद्धैवैवं विदुष
एतदहः सर्वैश्छंदोभिः प्रपन्नं भवति ॥१२॥ तानदूनविहरन्ति पुरुषो वै नदस्तस्मात्सुरु
षो वदन्त्सर्वः सन्नदतीव नदं वऽओदतीनामितीऽ॥ आपो वा ओदत्यो मादित्यास्ता हीदं
सर्वमुदं त्यापो वा ओदत्यो यामुरव्यास्ता हीदं सर्वमन्नाद्यमुदंति नदं योषुवतीनामितीऽ॥
आपो वाव योषुवत्यो या अन्तरिक्ष्यास्ता हि पोप्लूयन्त इवापो वाव योषुवत्यो यास्वेदते ता

१

हि सरीसृप्यन्त इव पतिं वो अघ्न्यानामितीऽ॥ आपो वा अघ्न्या आग्नेर्धूमाज्जायन्त आपो वा
अघ्न्यायाः त्रिम्नात्मसृज्यन्ते ध्येनूनामिपुध्यसीतीऽ॥ आपो वाव धेनवस्ता हीदं सर्वं धिन्वंती
पुध्यसीतियदाह पतीयसीत्येवैतदाह त्रिष्टुभं चानुष्टुभं च विहरन्ति वृषा वै त्रिष्टुब्योषानुष्टु
प्तन्मिथुनं तस्मादपि पुरुषो जायां वित्वा कृत्स्नतरमिवात्मानं मन्यते तास्त्रिः प्रथमया पंचविंश
तिर्भवंति पंचविंश आत्मा पंचविंशः प्रजापतिर्दश हस्त्या अंगुलयो दश पाद्या द्वावूरू द्वौ बाहू
आत्मैव पंचविंशस्तमिममात्मानं पंचविंशं संस्कुरुतेऽथो पंचविंशो वा एतदहः पंचविंश एत
स्याह्नः स्तोमस्तत्समेन समं प्रतिपद्यते तस्माद्धू एव पंचविंशतिर्भवंति ॥१३॥ नदितिं प्रतिपद्यते नदं
दिति वा अन्नमन्नमेवैतदभि प्रतिपद्यत एतां वाव प्रजापतिः प्रथमां वाचं व्याहरदेकाक्षरद्व्यक्षरां
ततेतितातेतितथैवैतत्कुमारः प्रथमवादी वाचं व्याहरत्येकाक्षरद्व्यक्षरां ततेतितातेतितयेवैतत्त

ऐ०आ० तवत्यांवाचाप्रतिपद्यतेतदुक्तमृषिणाबृहस्पतेप्रथमंवाचोअग्रमित्येतद्ध्येवप्रथमंवाचोअग्रंय
त्प्रैरतनामधेयंदधानाइतिवाचाहिनामधेयानिधीयंतेयदेषांश्रेष्ठंयदरिप्रमासीदित्येतद्ध्येव
श्रेष्ठमेतदरिप्रंप्रेणातदेषांनिहितंगुहाविरितीदमुहगुह्याध्यात्ममिमादेवताअदउआविरधि
१० दैवतमित्येतत्तदुक्तंभवति॥१४॥तदिदासभुवनेषुज्येष्ठमितिप्रतिपद्यतेयद्वैज्येष्ठंतन्महन्महद्व
द्रूपसमृद्धमेतस्याह्नोरूपंतांस्नतेकीर्तिमिषवन्महित्वेतिमहद्वद्रूपसमृद्धमेतस्याह्नोरूपंभय
द्रुहावृधेवीर्यायेतिवीर्यवद्रूपसमृद्धमेतस्याह्नोरूपंनरणामुत्वान्तंमंगीर्भिरुक्थैरित्युक्थंवाएतद
हरुक्थवद्रूपसमृद्धमेतस्याह्नोरूपंन्यूनाक्षरेप्रथमेपदेविहरतिन्यूनेवैरेतःसिच्यतेन्यूनेप्राणान् १०
न्यूनेन्नाद्यंप्रतिष्ठितमेतेषांकामानामवरुध्याएतान्कामानवरुंधेयएवंवेदद्वदशाक्षरेभवतउ
भयोरन्नाद्ययोरुपाप्त्यैयच्चपद्वद्यच्चापादकमित्येष्टादशाष्टादशाक्षराणिभवंतियानिदशानव

प्राणाआत्मैवदशमःसात्मनःसंस्कृतिरष्टावष्टाउद्यंतेऽभ्युतेयद्यत्कामयतेयएवंवेद॥१५॥ता
नदेनविहरतिप्राणोवैनदस्तस्मात्प्राणो नदन्त्सर्वःसन्नदतीवनदंवत्रोदतीनामितीदं॥
ग उष्णिगक्षरैर्भवत्यनुष्टुप्पादेरायुर्वाउष्णिग्वाग्नुष्टुप्तदस्मिन्नायुश्चवाचंचदधाति तास्त्रिःप्र
थमयापंचविंशतिर्भवंतिपंचविंशआत्मापंचविंशःप्रजापतिर्दशहस्त्याअंगुलयोदशपादा
द्वाउरूद्वौबाहूआत्मैवपंचविंशस्तमिममात्मानंपंचविंशंसंस्कुरुतेऽथोपंचविंशंवाएतदहः
पंचविंशाएतस्याह्नःस्तोमस्तत्समेनसमंप्रतिपद्यतेतस्माद्वेएवपंचविंशतिर्भवंतीत्यध्या
त्मंपंचविंशोथाधिदैवतंचक्षुःश्रोत्रंमनोवाक्प्राणस्ताएताःपंचदेवताइमंविष्टाःपुरुषंपंचो
हैवैतादेवताअयंविष्टःपुरुषःसोत्रालोमभ्यआनखेभ्यःसर्वःसाग्रआप्यतेतस्मात्सं
र्वाणिभूतान्यापिपीलिकाभ्यआहान्येवजायंतेतदुक्तमृषिणासहस्रधापंचदशान्युक्थे

अर॰प्र॰
त्र

११

तिपंचाहेदग्रातोभवंतियावद्द्यावापृथिवीतावदिदंतदितियावतीवैद्यावापृथिवीतावानात्मा
सहैंधामहिमानःसहस्रमित्युक्थान्येवतदनुमदतिमह्यतियावद्ध्रस्वविष्ठितंतावतीवा
गितियत्रहक्वचब्रह्मतद्वाग्यत्रवावाक्तद्ब्रह्मेत्येतत्तदुक्तंभवत्येषांवाएषांसूक्तानांनव
र्चंप्रथमंनववैप्राणाःप्राणानांक्लृप्त्यैषक्लृचंभवतिषड्वाऋतवऋतूनामाप्त्यैपंचर्चंभवति
पंचपदापंक्तिःपंक्तिर्वाअन्नमन्नाद्यस्यावरुध्यैतृचोभवतित्रयोवाइमेत्रिवृतोलोकाएषा
मेवलोकानामभिजित्यैताअभिसंपद्यंतेबृहतींछंदोमृतंदेवलोकमेषआत्मैवमुहैवेवंविदेत
येवसंपदामृतमेवात्मानमभिसंभवतिसंभवति॥१६॥इतिप्रथमारण्यकेतृतीयोध्यायः॥

११

॥ ॥अथसूददोहाःप्राणोवैसूददोहाःप्राणेनपर्वाणिसंदध्यात्तथातोग्रीवास्ताआचक्षतेय
थाकंदसमुत्स्विहइत्यथसूददोहाःप्राणोवैसूददोहाःप्राणेनपर्वाणिसंदध्यात्तथातःशिरस्त

द्गायत्रीषुभवत्यग्रंवैछंदसांगायत्र्यग्रमंगानांशिरस्तदर्कवतीषुभवत्यग्निर्वाअर्कस्तानवभ
वंतिनवकपालंवैशिरोदशमीत्वंसतितत्क्केशाइत्येवसाभवत्यथोस्तोमातिशंसनायाएव
तोत्रिवृच्चस्तोमोभवतोगायत्रंचछंदएतयोर्वैस्तोमछंदसोःप्रजातिमनुसर्वमिदंप्रजायतेय
दिदंकिंचप्रजास्येप्रजायतेप्रजयापशुभिर्यएवंवेदऽथसूददोहाःप्राणोवैसूददोहाःप्राणे
नपर्वाणिसंदध्यात्तथातोविजवस्ताविराजोभवंतितस्मात्पुरुषःपुरुषमाहविवाअस्मात्स्फ
जसि॥ग्रीवावैधारयसीतिस्तभमानंवायद्धुतस्संबाहुतमाःसत्योन्नतमांप्रत्यंचयंतेऽन्नं
हिविराळन्नमुवीर्यमथसूददोहाःप्राणोवैसूददोहाःप्राणेनपर्वाणिसंदधाति॥१७॥अ
थातोदक्षिणःपक्षःसोयंलोकःसोयमग्निःसावाक्तद्रथंतरंसवसिष्ठस्तच्छतंतानिषड्वीर्या
णिभवंतिसंपातएवकामानामध्यात्यैप्रतिष्ठित्याअन्नाद्यायपंक्तिरथसूददोहाःप्राणोवैसू

आर॰ प्र॰

ददोहाः प्राणेन पर्वाणि संदधाति यथा त उत्तरः पक्षः सोऽसौ लोकः सोऽसावादित्यस्तन्मनस्तद्बृ
हत्तस्य रश्मयस्तत्कृतं तानि षड्वीर्याणि भवंति संपात एव कामानामभ्यात्त्यै प्रतिष्ठित्या अन्ना
द्याय पंक्तिस्ता उ नातिरिक्तोऽभवतो वृषा वै बृहद्योषा रथंतरमतिरिक्तं वै पुंसोऽन्यूनं स्त्रियै
तस्माद्द्वनातिरिक्तोऽभवतोऽथो एकेन ह वै पत्रेण सुपर्णस्योत्तरः पक्षो ज्यायांस्तस्मादेकम

१२

वेत्तरः पक्षोऽभ्यायाभवत्यथ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधाति यथातः
पुच्छं ता एकविंशतिर्द्विपदा भवंत्यैकविंशतिहस्मानि प्रत्यंचि सुपर्णस्य पत्राणि भवंत्यथो
एकविंशो वै स्तोमानां प्रतिष्ठा प्रतिष्ठा पुच्छं वयसां द्वाविंशीं त्रींसति प्रतिष्ठयोरेव तद्रूपं क्रि

१२

यते तस्मात्सर्वाणि वयांसि पुच्छेन प्रतितिष्ठंति पुच्छेनैव प्रतिष्ठायोत्पतंति प्रतिष्ठा हि पुच्छं स
एष द्वाभ्यां दशिनीभ्यां विराड्भ्यामनयोर्द्वाविंशत्योर्द्विपदयोरयं पुरुषः प्रतिष्ठितस्तस्य य

सुपर्णरूपं तदस्य कामानामभ्याप्त्या अथ यत्सुरूपरूपं तदस्य श्रियै यत्रासेन्नाद्याया पचितिस्सा
अथ सूददोहा अथ धाय्या अथ सूददोहा वृषा वै सूददोहा योषा धाय्या तदुभयतः सूददोहसा
धाय्यां परिशंसति तस्माद्द्वयोरेतः सिक्तं स देकतामेवाप्येति योषामेवास्य तदाजानाहि योषा
तः प्रजा नात तस्मादेनामत्र शंसति ॥१८॥ गायत्रीं तृचाशीतिं शंसत्ययं वै लोको गायत्री तृचाशी
तिर्य देवास्मिन्लोके यज्ञो यन्महो यन्मिथुनं यदन्नाद्यं या पचितिस्तदस्ना वै तदाप्नवानि तदवरु

दि

णधै तन्मे सत्स्यथ सूददोहाः प्राणो वै सूददोहाः प्राणेनेमं लोकं संतनोति बार्हतीं तृचाशीतिं शंस
त्यंतरिक्षलोको वै बार्हती तृचाशीतिर्य देवांतरिक्षलोके यज्ञो यन्महो यन्मिथुनं यदन्नाद्यं या
पचितिस्तदस्ना वै तदाप्नवानि तदवरुणधै तन्मे सदित्यथ सूददोहाः प्राणो वै सूददोहाः प्राणेनांत
रिक्षलोकं संतनोत्यौष्णिहीं तृचाशीतिं शंसत्यसौ वै लोको द्यौरौष्णिही तृचाशीतिर्य देवामुष्मिन्

अ॰र॰प्र॰

१३

लोके यशो यन्महो यन्मिथुनं यदन्नाद्यं यापचितिर्य देवानां देवं तदश्नवै तदश्नवानीति तदेवरु
णद्धे तन्मे सदित्यथ सूददोहाः प्राणो वै सूददोहाः प्राणेनामुं लोकं संतनोति संतनोतीति ॥३॥
॥ इति प्रथमारण्यके चतुर्थोऽध्यायः ॥ ॥ वशं त्वां शंसति वशो मह इदं सर्वमस्मादिति ता एकविंश
तिर्भवंत्येकविंशत्यतिरिक्ता अन्नं तरूदरे वि कृतयोऽथो एकविंशो वै स्तोमानां प्रतिष्ठा प्रतिष्ठो द
रमन्नाद्यानां ता विछंदसो भवंति विक्रूद्रमिव वा अन्नं तस्य मणीयइव च स्थवीयइव च ताः प्रा
णा वं छंदस्कारं यथोपपादं शंसति यथोपपादमिव वा अन्नं तस्यं क्रसीयइव च द्राघीयइव चा
थ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधाति तामत्रोत्सृजति हृदस्राकृत्वा
त्वा हृदस्राविधा वा इमे प्राणाः स सत्रीर्षण्या द्वे स्तन्यौ त्रमो वाञ्चो त्र वै प्राणा आप्यंते त्र सं
स्क्रियंते तस्मादेनामत्रोत्सृजती द्वाग्नी पूर्वं स्वन ईत्सं द्वाग्न्युत्तरं उर्वशी वै प्रतिष्ठेताः षट्

१३

पदा भवंति प्रतिष्ठाया एव हि प्रतिष्ठो वै पुरुष पशवश्चतुष्पादाः पशवो यजमानमेव तद्धि प्रतिष्ठं चतु
ष्पात्सु पशुषु प्रतिष्ठापयति द्वितीयास सप्तपदा भवति तां गायत्रीं चानुष्टुभं च करोति ब्रह्म वै गा
यत्री वागनुष्टुप् ब्रह्मणैव तद्वाचं संदधाति त्रिष्टुभमंततः शंसति वीर्यं वै त्रिष्टुब्वीर्येणैव तत्
पशून्परिगछति तस्मात्सत्रावो वीर्यमनु प्रतिष्ठंत ईर्यतां चैवाभ्युत्थानं च ॥२०॥ प्रवो महे मंदमा
नायांधस इत्यैंद्रे निष्केवल्ये निविदं दधाति प्रत्यक्षाद्धैव तदात्मन्वीर्यं धत्ते तास्त्रिष्टुब्जग
त्यो भवंति तदाकुः रथ कस्मा त्रिष्टुब्जगतीषु निविदं दधातीति न ह वा एतस्याह्न एकं छंदो नि
विदं दधानं विव्याचेति तस्मात्त्रिष्टुब्जगतीषु निविदं दधातीति तदेतदहस्त्रिनिवित्कं विद्याद्द्रोनि
२
विद्धालखिल्यानि विद्धानि विदेवानि विदेवमेनं त्रिनिवित्कं विद्यादथ सूक्ते वनेन वायोन्यधायि चा
कन्यो जात एव प्रथमो मनस्वानिति तयोरस्त्यन्ने समस्य यदसन्मनीषा इत्यन्नाद्यस्यावरुध्या

अ॰र॰प्र॰

अथावपनमेतेऽन्तरेणैन्द्रीणां द्र्यातीनां त्रिष्टुब्जगतीनां बृहतीसंपन्नानां यावतीरावपंते ता
वं स्वूर्ध्वमासुषो वर्षाणि जीवंत्येते न हैवावपनेनासुराप्यते प्रजां मे पशवोर्जयन्निति त्वेव सजनी
यमनुशंसति तार्क्ष्यं शंसति स्वस्त्ययनं वै तार्क्ष्यः स्वस्तितायै स्वस्त्ययनमेव तत्कुरुत एकपदां शं

१४

सत्येकधेदं सर्वमसानीत्यथो सर्वान्छंदस्कृतिमाप्नवानीती द्वं विश्वा अवी वृधन्निति पदानुषं
गास्ता: सप्तानुषजति सप्त वै शीर्षन्प्राणा: शीर्षन्नेव तत्प्राणान्दधात्येष्टमीनानुषजति वाग
ष्टमी नेन्मे वाक् प्राणैरनुषक्तासदिति तस्मादु सा वाक् समानायतना प्राणै: सत्यननुषक्ताऽवि
राज: शंसत्यन्नं वै विराजोन्नाद्यस्यावरुध्यै वासिष्ठं न परिदधाति वसिष्ठो सानीत्येष स्तोमो

१४

महउग्राय वाहइतिमहद्वत्या रूपसमृद्धया धुरावाल्योनवाजयन्नधायीत्यंतो वै धूरंतएतदह
रेतस्याह्नो रूपमिंद्र त्वायमर्क ईट्टे वसूनामित्यर्कवत्या रूपसमृद्धया दिवीव द्यामधिन: श्रोम

तं धा इति यत्र ह क्व च ब्रह्मण्यावागुद्यते तद्धास्य कीर्तिर्भवति यत्रैवं विद्वानेतयाप
रिदधातीति तस्मादेवं विद्वानेतयैव परिदध्यात् ॥२१॥ तत्सवितुर्वृणीमहे द्यानो देव स
वितरिति वैश्वदेवस्य प्रतिपदनुचरौ वैकाहिकौ रूपसमृद्धौ बह्व वा एतस्मिन्नहनि किंच
किंच वारणं क्रियते शांत्या एव शांतिर्वै प्रतिष्ठाकाह: शांत्यामेव तत्प्रतिष्ठायामंतत: प्रति
तिष्ठंति प्रतितिष्ठति य एवं वेद येषां चैवं विद्वानेतद्धोता शंसति तद्देवस्य सवितुर्वार्यं महदिति
सावित्रमंतो वै महदंत एतदहरेतस्याह्नो रूपं कतरा पूर्वा कतरापरायोरिति द्यावापृथिवीयं
समानोदर्के समानोदर्कं वा एतदहरेतस्याह्नो रूपमनश्वो जातो अनभीशुरुक्थ्य इत्यार्भवं
रथस्त्रिचक्र इति यदेतत्त्रिवदंतो वै त्रिवदंत एतदहरेतस्याह्नो रूपमस्य वामस्य पलि
तस्य होतुरिति वैश्वदेवं बहु रूपं बहुरूपं वा एतदहरेतस्याह्नो रूपं गोरीर्मिमाय सलिलानि

अर॰प्र॰

तक्षतीत्येतद्दंतमानो भद्राः क्रतवो यंतु विश्वत इति वैश्वदेवं निविद्धानमेकाहिकं रूपसमृद्धं
व कुर्वा एतस्मिन्नहनि किंच किंच वारुणं क्रियते शांत्या एव शांतिर्वै प्रतिष्ठैकाहः शांत्यामेव
तत्प्रतिष्ठायामंततः प्रतितिष्ठंति प्रतितिष्ठति य एवं वेद ये त्वाग्ने चैवं विद्वानेतदुक्तानां शंसति वै

१५

श्वानराय धिषणामृतावृध इत्याग्निमारुतस्य प्रतिपदं तो वै धिषणं तदेतदहरेतस्याह्नो रू
पं प्र यज्यवो मरुतो भ्राजदृष्टय इति मारुतं समानोदर्कं समानोदर्कं वा एतदहरेतस्याह्नो रू
पं जातवेदसे सुनवाम सोममिति जातवेदस्यां पुरस्तात्सूक्तस्य शंसति स्वस्त्ययनं वै जातवे
दस्याः स्वस्तितायै स्वस्त्ययनमेव तत्कुरुत इमं स्तोममर्हते जातवेदस इति जातवेदस्यं स
मानोदर्कं समानोदर्कं वा एतदहरेतस्याह्नो रूपमह्नो रूपं ॥२२॥ ॥इत्यैतरेयप्रथमार
ण्यके पंचमोऽध्यायः॥ ॥ ॥इत्यैतरेयप्रथमारण्यकं समाप्तं॥ ॥ ॥ ॥

१५

॥हरिः ओं॥ ॥एष पंथा एतत्कर्मैतद्ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येत्तन्नातीयान्नह्य
त्यायन्पूर्वे ये सात्ययंस्ते पराबभूवुस्तदुक्तमृषिणा प्रजा ह तिस्रो अत्यायमीयुर्न्य१न्या अर्क
मभितो विविश्रे॥ बृहद्ध तस्थौ भुवनेष्वंतः पवमानो हरित आविवेशेति प्रजा ह तिस्रो अत्या
यमीयुरिति या वै ता इमाः प्रजास्तिस्रो अत्यायमायंस्तानीमानि वयांसि वंगावगधाश्चेर
पादान्यन्या अर्कमभितो विविश्र इति ता इमाः प्रजा अर्कमभितो निविष्टा इममेवाग्निं बृहद्ध
तस्थौ भुवनेष्वंतरित्यद उ एव बृहद्भुवनेष्वंतरसावादित्यः पवमानो हरित आविवेशेति वा
युरेव पवमानो दिशो हरित आविष्टः ॥१॥ उक्थमुक्थमिति वै प्रजा वदंति तदिदमेवोक्थमि
यमेव पृथिवीतो हीदं सर्वमुत्तिष्ठति यदिदं किंच तस्याग्निरर्कोऽन्नमशीतयोन्नेन हीदं सर्वम
श्नुतेंतरिक्षमेवोक्थमंतरिक्षं वा अनुपतंत्यंतरिक्षमनुधावयंति तस्य वायुरर्कोऽन्नमशीति

रिः

योन्नेन हीदं सर्वमश्नुते सावै वद्यौरुक्थमस्तु तः प्रदाना द्धीदं सर्वमुत्तिष्ठति यदिदं किंच त
स्यासावादित्यो र्केन्नमशीत योन्नेन हीदं सर्वमश्नुत इत्यधिदेवतमथाध्यात्मं पुरुष एवोक्थ
मयमेव महान्प्रजापतिरहमुक्थमस्मीति विद्यात्तस्य मुखमेवोक्थं यथा पृथिवी तथा तस्य
वागर्केन्नमशीत योन्नेन हीदं सर्वमश्नुते नासिके एवोक्थं यथांतरिक्षं तथा तस्य प्राणो र्केन्न
मशीत योन्नेन हीदं सर्वमश्नुते तदेतद्बृध्नस्य विष्टपं यदेतन्नासिकायै विनतमिव ललाटमे
वोक्थं यथा द्यौस्तथा तस्य चक्षुरर्केन्नमशीत योन्नेन हीदं सर्वमश्नुते समानमशीत योध्या
त्मं चाधिदेवतं चान्नमेवान्नेन हीमानि सर्वाणि भूतानि समनंतीत्य ॥ अन्नेनेमं लोकं जयत्य
न्नेनामुं तस्मात्समानमशीत योध्यात्मं चाधिदेवतं चान्नमेव तदिदमन्नमन्नादमियमेव पृथि
वी नो हीदं सर्वमुत्तिं यदिदं किंच यद्धकिंचेदं प्रेतीत्य ३ ॥ तदसौ सर्वमत्ति यदु किंचातः प्रेतीत्य ॥

१८

पति

१८

तदियं सर्वमत्ति सेयमित्सा द्यास्यत्ता ह वा अस्याद्यो भवति न तस्येशे यं नाद्याद्येष्टनं नाद्यः ॥ ५ ॥ अ
थातो रेतसः सृष्टिः प्रजापते रेतो देवा देवानां रेतो वर्षं वर्षस्य रेत ओषधय ओषधीनां रेतोन्न
मन्नस्य रेतो रेतो रेतसो रेतः प्रजाः प्रजानां रेतो हृदयं हृदयस्य रेतो मनो मनसो रेतो वाग्वाचो
रेतः कर्म ॥ तदिदं कर्म कृतमयं पुरुषो ब्रह्मणो लोकः स इरामयो यद्धीरामयस्तस्माद्धिरण्मयो
हिरण्मयो ह वा अमुष्मिंल्लोके संभवति हिरण्मयः सर्वेभ्यो भूतेभ्यो ददृशेय एवं वेद ॥ ६ ॥ तं प्र
पदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं यत्प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं तस्मात्प्रपदे तस्मात्प्रपदे
इत्याचक्षते शफाः खुरा इत्यन्येषां पशूनां तदूर्ध्वमुदसर्पत्ता ऊरू अभवतामुरुग्गणीह्यब्र
वीत्तदुदरमभवदुर्वेवमेकुर्विस्यब्रवीत्तदुरोभवदुदरं ब्रह्मेति शार्कराक्ष्या उपासते हृदयं ब्रह्मे
त्यारुण्यो ब्रह्माहैव ता इ ३ ॥ ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोश्रयत यच्छिरोश्रयत तच्छिरोभवत्तच्छि

व

रसः शिरस्त्वं ता एताः शीर्षञ्छ्रियः श्रितांश्चक्षुः श्रोत्रं मनो वाक् प्राणः श्रयंतेऽस्मिञ्छ्रियो य ए
वमेतच्छिरसः शिरस्त्वं वेद ता अहिंसंताहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन्हंत ता
स्माच्छरीरादुत्क्रामाम तद्यस्मिन्न उत्क्रांत इदं शरीरं पत्स्यति तदुक्थं भविष्यतीति वागुद
क्रामदवदन्नश्नन्पिबन्नास्तेव चक्षुरुदक्रामदपश्यन्नश्नन्पिबन्नास्तेव श्रोत्रमुदक्रामद
श्रृण्वन्नश्नन्पिबन्नास्तेव मन उदक्रामन्मीलित इवाश्नन्पिबन्नास्तेव प्राण उदक्रामत्तत्प्रा
ण उत्क्रांतेऽपद्यत तदशीर्यत शारीरीति ॥ तच्छरीरमभवत्तच्छरीरस्य शारीरत्वं शीर्यते ह वा
अस्य द्विषन्पाप्मा भ्रातृव्यः परास्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद ता अहिंसंते
वाहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन्हंतेदं पुनः शरीरं प्रविशाम तद्यस्मिन्नः प्रपन्न
इदं शरीरमुत्थास्यति तदुक्थं भविष्यतीति वाक् प्राविशदशायदेव चक्षुः प्राविशदशाय

देव श्रोत्रं प्राविशदशायदेव मनः प्राविशदशायदेव प्राणः प्राविशत्तत्प्राणे प्रपन्न उदतिष्ठ
त्तदुक्थमभवत्तदुक्थात्वम् ॥ प्राण एव प्राण उक्थमित्येव विद्यात्तं देवा अब्रुवन्त्वमुक्थमसि
त्वमिदं सर्वमसि तव वयं स्मस्त्वमस्माकमसीति तदेतदृषिणोक्तं त्वमस्माकं तव स्मसीति ॥
॥४॥ तं देवाः प्राणयंत स प्रणीतः प्राताय्यत प्रातायीति ॥ तत्प्रातरभवत्समागादिति ॥ तत्
सायमभवदहरेव प्राणो रात्रिरपानो वागग्निश्चक्षुरसावादित्यश्चंद्रमा मनो दिशः श्रोत्रं स एष
प्रहितां संयोगोऽध्यात्ममिमा देवता अद उ आधिदैवतमित्येतत्तदुक्तं भवत्येतद्धस्मैवैतद्वि
द्वानाह हिरण्यदन्बैदो न तस्यैश इयं महर्घ्यं न दघ्रऽरिति प्रहितां वा अहमध्यात्मं संयोगं निविष्टं वेदे
तद्ध तदनीशानानि ह वा अस्मै भूतानि बलिं हरंति य एवं वेद तत्सत्यं सदिति प्राणस्ती सत्यं
यमित्यसावादित्यस्तदेतत्त्रिवृत्त्रिवृदिव वै चक्षुः शुक्लं कृष्णं कनीनिकेति स यदि ह वा अ

अर॰ द्वि॰

पिमृषावदतिससत्यंहैवास्योदितंभवतियएवमेतत्सत्यस्यसत्यंवेद॥५॥तस्यवाक्तंतिर्ना
मानिदामानितदस्येदंवाचातंत्यानामभिर्दामभिःसर्वंसितंसर्वंहीदंनामनी॥सर्वंवाचा
भिवदतिवहतिहवाएनंतंतिःसंबद्धायएवंवेदतस्योष्णिग्लोमानित्वग्गायत्रीत्रिष्टुम्मांस

१८

मनुष्टुप्स्नावान्यस्थिजगतीपंक्तिर्मज्जाप्राणोबृहतीसछंदोभिश्छन्नोयच्छंदोभिश्छन्नस्तस्मा
च्छंदांसीत्याचक्षतेछादयंतिहवाएनंछंदांसिपापात्कर्मणोयस्यांकस्यांचिद्दिशिकामयते
यएवमेतच्छंदसांछंदस्त्वंवेदतदुक्तमृषिणाऽपश्यंगोपामित्येषवैगोपाएषहीदंसर्वंगोपा
यत्यनिपद्यमानमितिनह्येषकदाचननसंविशत्याचपराचपथिभिश्चरंतमित्याचह्येषपराच

१८

पथिभिश्चरतिससध्रीचीःसविषूचीर्वसानइतिसध्रीचीश्चह्येषविषूचीश्चवस्तइमाएवदिश
आवरीवर्तिभुवनेष्वंतरित्येषह्यंतर्भुवनेष्वावरीवर्त्यथोआवृतासोवतासोनकर्तृभिरिति

सर्वंहीदंप्राणेनावृतंसोयमाकाशःप्राणेनबृहत्याविष्टब्धस्तद्यथायमाकाशःप्राणेनबृह
त्याविष्टब्धएवंसर्वाणिभूतान्यापिपीलिकाभ्यःप्राणेनबृहत्याविष्टब्धानीत्येवविद्यात्॥
॥६॥अथातोविभूतयोस्यपुरुषस्यतस्यवाचःसृष्टौपृथिवीचाग्निश्चास्यामोषधयोजा
यंतेऽग्निरेनाःस्वदयतीदमाहरतेदमाहरतेत्येवमेतौवाचंपितरंपरिचरतःपृथिवीचा
ग्निश्चयावदनुपृथिवीयावदन्वग्निस्तावानस्यलोकोभवतिनास्यतावल्लोकोजीर्यते
यावदेतयोर्नजीर्यतेपृथिव्याश्चाग्नेश्चयएवमेतांवाचोविभूतिंवेदप्राणेनसृष्टावंतरि
क्षंचवायुश्चांतरिक्षंवाअनुचरंत्यंतरिक्षमनुशृण्वंतिवायुरस्मैपुण्यंगंधमावहत्ये
वमेतौप्राणंपितरंपरिचरतोंतरिक्षंचवायुश्चयावदन्वंतरिक्षंयावदनुवायुस्तावान
को स्यलोकोभवतिनास्यतावल्लोकोजीर्यतेयावदेतयोर्नजीर्यतेंतरिक्षस्यचवायोश्चयए

आर·द्वि· १९

वमेतां प्राणस्य विभूतिं वेद चक्षुषास्य सृष्टौ द्यौश्चादित्यश्च द्यौर्हास्मै वृष्टिमन्नाद्यं संप्रयच्छ
त्यादित्योऽस्य ज्योतिः प्रकाशं करोत्येवमेतौ चक्षुः पितरं परिचरतो द्यौश्चादित्यश्च यावद
नु द्यौर्यावदन्वादित्यस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावद्देतयोर्न जीर्य
ते दिवश्चादित्यस्य च य एवमेतां चक्षुषो विभूतिं वेद श्रोत्रेणास्य सृष्टा दिशश्च चंद्रमाश्च दि
ग्भ्यो हैनमायंतीर्शृं ॥ दिग्भ्यो विशृणोति चंद्रमा अस्मै पूर्वपक्षापरपक्षान्विचिनोति पुण्याय
कर्मण एवमेते श्रोत्रं पितरं परिचरंति दिशश्च चंद्रमाश्च यावदनु दिशो यावदनु चंद्रमास्तावा
नस्य लोको भवति नास्य तावल्लोको जीर्यते यावद्देतेषां न जीर्यते दिशां च चंद्रमसश्च य एवमेतां श्रो
त्रस्य विभूतिं वेद मनसास्य सृष्टा आपश्च वरुणश्चापो हास्मै श्रद्धां संनमंते पुण्याय कर्मणे वरुणो
ऽस्य प्रजां धर्मेण दाधारैवमेते मनः पितरं परिचरंत्यापश्च वरुणश्च यावदन्वापो यावदनु वरुण

१९

स्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावद्देतेषां न जीर्यतेऽपां च वरुणस्य च य एवमेतां
मनसो विभूतिं वेद ॥ ७ ॥ आपाः इत्यापद्यति ॥ तदिदमाप एवेदं वै मूलमदस्तूलमर्यपितैते पुत्राय
त्र हृक्के च पुत्रस्य तत्पितुर्यत्र वा पितुस्तद्वा पुत्रस्यैतत्तदुक्थं भवतेतद्ध स्मैवैतद्विद्वानाह महिदा
स ऐतरेय आह मां देवेभ्यो वेद ॥ ओमद्दे वान्वेदेतः प्रदानात्येत इतः संभृता इति स एष गिरिश्च
क्षुः श्रोत्रं मनो वाक् प्राणस्तं ब्रह्मगिरिरित्याचक्षते गिरति ह वै द्विषंतं पाप्मानं भ्रातृव्यं परास्य
द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद स एषोऽसुः स एष प्राणः स एष भूतिश्चाभूतिश्च तं भूतिरि
ति देवा उपासांचक्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसित्यभूतिरित्यसुरास्ते
ह पराबभूवुर्भवत्यात्मना परास्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद स एष मृत्युश्चैवामृतं
च तदुक्तमृषिणाऽपाङ् प्राङेति स्वधया गृभीत इत्यपानेन ह्ययं यतः प्राणो न पराङ् भवत्यमर्त्यो

अ·द्वि·

मर्त्येनासयोनिरित्येतेन हीदं सर्वं सयोनि मर्त्यानि हीमानि शरीराणी३ं॥ अमृतैषा देव
ता ता शश्वंता विषूचीना वियंता न्यन्यं चिक्युर्न निचिक्युरन्यमिति निचिन्वंति हैवेमा
नि शरीराणी३ं॥ अमृतैवैषा देवताऽमृतो ह वा अमुष्मिंल्लोके संभवत्यमृतः सर्वेभ्यो भू
तेभ्यो ददृशे य एवं वेद य एवं वेद ॥८॥ ॥इति द्वितीयारण्यके प्रथमोऽध्यायः॥ ॥एष इमं लो
कमभ्यार्चत्पुरुषरूपेण य एष तपति प्राणो वाव तदभ्यार्चत्प्राणो ह्येष य एष तपति तं शतं व
र्षाण्यभ्यार्चत् तस्माच्छतं वर्षाणि पुरुषायुषो भवंति तं यच्छतं वर्षाण्यभ्यार्चत् तस्माच्छत
र्चिनस्तस्माच्छतर्चिन इत्याचक्षत एतमेव संतं स इदं सर्वं मध्यतो दधे यदिदं किंच स यदिदं स
र्वं मध्यतो दधे यदिदं किंच तस्मान्माध्यमास्तस्मान्माध्यमा इत्याचक्षत एतमेव संतं प्राणो वै
गृत्सोऽपानो मदः स यत्प्राणो गृत्सोऽपानो मदस्तस्माद्गृत्समदस्तस्माद्गृत्समद इत्याचक्षत

२०

एतमेव संतं तस्येदं विश्वं मित्रमासीद्यदिदं किंच तद्यदस्येदं विश्वं मित्रमासीद्यदिदं किंच
तस्माद्विश्वामित्रस्तस्माद्विश्वामित्र इत्याचक्षत एतमेव संतं तं देवा अब्रुवन्नयं वै नः सर्वेषां
वाम इति तं यद्देवा अब्रुवन्नयं वै नः सर्वेषां वाम इति तस्माद्वामदेवस्तस्माद्वामदेव इत्याच
क्षत एतमेव संतं स इदं पाप्मनोऽत्रायत यदिदं किंच स यदिदं सर्वं पाप्मनोऽत्रायत यदिदं किंच
तस्मादत्रयस्तस्मादत्रय इत्याचक्षत एतमेव संतं ॥१॥ एष उ एव बिभ्रद्वाजः प्रजा वै वाजस्ता
एष बिभर्त्ति यद्बिभर्त्ति तस्माद्भरद्वाजस्तस्माद्भरद्वाज इत्याचक्षत एतमेव संतं तं देवा अब्रुव
न्नयं वै नः सर्वेषां वसिष्ठ इति तं यद्देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तस्माद्वसिष्ठस्तस्माद्व
सिष्ठ इत्याचक्षत एतमेव संतं स इदं सर्वमभिप्रागाद्यदिदं किंच स यदिदं सर्वमभिप्रागाद्यदिदं किं
च तस्मात्प्रगाथास्तस्मात्प्रगाथा इत्याचक्षत एतमेव संतं स इदं सर्वमभ्यपवयत यदिदं किंच

सर्वं

प

यदिदंकिंच

अर॰२ सयदिदंसर्वमभ्यपवयतेतस्मात्पावमान्यस्तस्मात्पावमान्यइत्याचक्षतएतमेवसंतंसोऽब्रवीद
हमिदंसर्वमसानियच्चक्षुद्रंयच्चमहदितितेक्षुद्रसूक्ताश्चाभवन्महासूक्ताश्चतस्मात्क्षुद्र
सूक्तास्तस्मात्क्षुद्रसूक्ताइत्याचक्षतएतमेवसंतंसूक्तंबतनोवोचेतितत्सूक्तमभवत्तस्मात्सूक्तं
२१ तस्मात्सूक्तमित्याचक्षतएतमेवसंतमेषवाऋगेषह्येभ्यःसर्वेभ्योभूतेभ्योर्चतसयदेभ्यःस
र्वेभ्योभूतेभ्योर्चततस्मादृक्तस्मादृगित्याचक्षतएतमेवसंतमेषवाअर्धर्चएषह्येभ्यःसर्वेभ्यो
र्धेभ्योर्चतसयदेभ्यःसर्वेभ्योर्धेभ्योर्चततस्मादर्धर्चस्तस्मादर्धर्चइत्याचक्षतएतमेवसंतमेषवै
पदमेषहीमानिसर्वाणिभूतानिपादिसयदिमानिसर्वाणिभूतानिपादितस्मात्पदंतस्मात्पदमि २१
त्याचक्षतएतमेवसंतमेषवाअक्षरमेषह्येभ्यःसर्वेभ्योभूतेभ्यःक्षरतिनचैनमतिक्षरंतिसय
देभ्यःसर्वेभ्योभूतेभ्यःक्षरतिनचैनमतिक्षरंतितस्मादक्षरंतस्मादक्षरमित्याचक्षतएतमेवसंतं

तावाएताःसर्वाऋचःसर्वेवेदाःसर्वेघोषाएकैवव्याहृतिःप्राणएवप्राणऋचइत्येवविद्यात्॥
॥१०॥विश्वामित्रंह्येतदहःशंसिष्यंतमिंद्रउपनिषसादसहान्नमित्यभिव्याहृत्यबृहतीस
हस्रंशशंसतेनेंद्रस्यप्रियंधामोपेयायतमिंद्रउवाचऋषेप्रियंवैमेधामोपागाःसवाऋषे
द्वितीयंशंसेतिसहान्नमित्येवाभिव्याहृत्यबृहतीसहस्रंशशंसतेनेंद्रस्यप्रियंधामोपेयाय
तमिंद्रउवाचऋषेप्रियंवैमेधामोपागाःसवाऋषेतृतीयंशंसेतिसहान्नमित्येवाभिव्याहृ
त्यबृहतीसहस्रंशशंसतेनेंद्रस्यप्रियंधामोपेयायतमिंद्रउवाचऋषेप्रियंवैमेधामोपागा
वरंतेददामीतिसहोवाचत्वामेवजानीयामितितमिंद्रउवाचप्राणोवाअहमस्म्यृषेप्राणस्त्वं
प्राणःसर्वाणिभूतानिप्राणोह्येषयएषतपतिसएतेनरूपेणसर्वादिशोविष्टोस्मितस्यमे
न्नंमित्रंदक्षिणंतद्वैश्वामित्रमेषतपन्नेवास्मीतिहोवाच॥११॥तद्यदिदंबृहतीसहस्रंसंप

आर॰ द्वि॰

न्नंतयोस्यैनिर्व्यंजनानितच्छरीरंयोघोषःसआत्मायउष्माणःसप्राणएतद्धस्मवैतद्विद्वान्वसि
ष्ठोवसिष्ठोबभूवततएतन्नामधेयंलेभएतदुहेवेंद्रोविश्वामित्रायप्रोवाचैतदुहेवेंद्रोभरद्वा
जायप्रोवाचतस्मात्सतेनबंधुनायज्ञेषुहूयतेतद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्य
बृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांसहस्राणिभवंतितावंतिशतसंवत्सर
स्याह्नांसहस्राणिभवंतिव्यंजनैरेवरात्रीराप्नुवंतिस्वरैरहानितद्वाइदंबृहतीसहस्रंसंपन्नं
तस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यपरस्तात्प्रज्ञामयोदेवतामयोब्रह्ममयोमृत
मयःसंभूयदेवताअप्येतियएवंवेदतद्योहंसोसौयोसौसोहंतदुक्तमृषिणासूर्यआ
त्माजगतस्तस्थुषश्चेत्येतदुहेवोपेक्षेतोपेक्षेत॥१२॥ ॥इतिद्वितीयारण्यकेद्वितीयो
ध्यायः॥ ॥योहवाआत्मानंपंचविधमुक्थंवेदयस्मादिदंसर्वमुत्तिष्ठतिससंप्रतिवि

२२

त्पृथिवीवायुराकाशआपोज्योतींषीत्येषवाआत्मोक्थंपंचविधमेतस्माद्धीदंसर्वमुत्तिष्ठत्ये
तमेवाप्येत्यायनंहवैसमानानांभवतियएवंवेदतस्मिन्योन्नंचान्नादंचवेदाहास्मिन्न
न्नादोजायतेभवत्यस्यान्नमापश्चपृथिवीचान्नमेतन्मयानिह्यन्नानिभवंतिज्योतिश्चवा
युश्चान्नादमेताभ्यांहीदंसर्वमन्नमत्त्यावपनमाकाशआकाशेहीदंसर्वंसमोप्यतआव
पनंहवैसमानानांभवतियएवंवेदतस्मिन्योन्नंचान्नादंचवेदाहास्मिन्नन्नादोजायते
भवत्यस्यान्नमोषधिवनस्पतयोन्नंप्राणभृतोन्नादमोषधिवनस्पतीन्हिप्राणभृतो
दंतितेषांयउभयतोदंताःपुरुषस्यानुविधांविहितास्तेन्नादाअन्नमितरेपशवस्तस्मा
त्तइतरान्पशूनधीवचरंत्यधीवह्यन्नेन्नादोभवत्यधीवहसमानानांजायतेयएवंवेद॥
॥१२॥तस्ययआत्मानमाविस्तरांवेदाश्नुतेहाविर्भूयओषधिवनस्पतयोयच्चकिंच

आर•द्वि•

२३

प्राणभृत्स्वात्मानमाविस्तरांवेदौषधिवनस्पतिषुहिरसोदृश्यतेचित्तंप्राणभृत्सुप्राणभृ
त्सुत्वेवाविस्तरामात्मातेषुहिरसोपिदृश्यतेनचित्तमितरेषुपुरुषेत्वेवाविस्तरामात्मासहिप्र
ज्ञानेनसंपन्नतमोविज्ञातंवदतिविज्ञातंपश्यतिवेदश्वस्तनंवेदलोकालोकौमर्त्येनामृतमीप्स
त्येवंसंपन्नोथेतरेषांपशूनामशनापिपासेएवाभिविज्ञानंनविज्ञातंवदंतिनविज्ञातंपश्यंतिन
विदुःश्वस्तनंनलोकालोकौतएतावंतोभवंतियथाप्रज्ञंहिसंभवाः॥१४॥सएषपुरुषःसमुद्रःस
र्वंलोकमतियद्धकिंचाश्नुतेत्येनंमन्यतेयद्यंतरिक्षलोकमश्नुतेत्येनंमन्यतेयद्यमुंलोकमश्नु
वीतात्येवैनंमन्येतसएषपुरुषःपंचविधस्तस्ययदुष्णंतज्ज्योतिर्यानिखानिसआकाशोथय
ल्लोहितंश्लेष्मारेतस्ताआपोयच्छरीरंसापृथिवीयःप्राणःसवायुःसएषवायुःपंचविधःप्राणो
पानोव्यानउदानःसमानस्ताएतादेवताःप्राणापानयोरेवनिविष्टाश्चक्षुःश्रोत्रंमनोवागिति

२३

प्राणस्यह्यन्वपायमेताअपियंतिसएषवाचश्चित्तस्योत्तरोत्तरिक्रमोयद्यज्ञःसएषयज्ञःपंच
विधोग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यानिपशुःसोमःसएषयज्ञानांसंपन्नतमोयत्सोम
एतस्मिन्ह्येताःपंचविधाअधिगम्यंतेयत्पुरासवनेभ्यःसैकाविधात्रीणिसवनानिय
दूर्ध्वंसापंचमी॥१५॥योहवैयज्ञेयज्ञंवेदाहन्यहर्देवेषुदेवमध्यूळ्हंससंप्रतिविदेषवैय
ज्ञेयज्ञोहन्यहर्देवेषुदेवोध्यूळ्होयदेतन्महदुक्थंतदेतत्पंचविधंत्रिवृत्पंचदशंसप्तदशमे
कविंशंपंचविंशमितिस्तोमतोगायत्रंरथंतरंबृहद्भद्रंराजनमितिसामतोगायत्र्युष्णि
ग्बृहतीत्रिष्टुब्द्विपदेतिछंदस्तःशिरोदक्षिणःपक्षउत्तरःपक्षःपुच्छमात्मेत्याख्यानं
पंचकृत्वःप्रस्तौतिपंचकृत्वउद्गायतिपंचकृत्वःप्रतिहरतिपंचकृत्वउपद्रवतिपंचकृ
त्वोनिधनमुपयंतितत्स्तोभसहस्रंभवत्येवंह्येताःपंचविधाअनुशस्यंतेयत्पराक्तृचा

अ२॰२

शीतिभ्यः सैकविंश्या तिस्रस्तृचाशीतयो यदूर्ध्वं सा पंचमी तदेतत्सहस्रं तत्सर्वं तानि दश
दशेति वै सर्वमेतावती हि संख्या दश दशा दशतस्त छतं शता शतानि तत्सहस्रं तत्सर्वं तानि त्री
णि छंदांसि भवंति त्रेधा विहितं वा इदमन्नमशनं पानं खादस्तदेतेनाप्नोति ॥१६॥ तद्वा इदं बृ

२४

हती सहस्रं संपन्नं तद्वै तदेके नानाछंदसां सहस्रं प्रतिजानते किमन्यत्स दन्यद्ब्रूयामेति त्रिष्टु
प्सहस्रमेके जगतीसहस्रमेकेनुष्टुप्सहस्रमेके तदुक्तमृषिणानुष्टुभमनु चर्चूर्यमाणमिं
द्रं निचिक्युः कवयो मनीषेति वाचि वैतदेंद्रं प्राणं न्यचायन्नित्येतत्तदुक्तं भवति स हेश्वरो यशस्वी
कल्याणकीर्त्तिर्भवितोरीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माहाकृत्स्नो ह्येष आत्मा यद्वागभि

२४

हि प्राणेन मनसेस्यमानो वाचा नानुभवति बृहतीमभिसंपादयेदेष वै कृत्स्न आत्मा यद्बृहती
सोयमात्मा सर्वतः शरीरैः परिवृतस्तद्यथायमात्मा सर्वतः शरीरैः परिवृत एवमेव बृहती सर्व

तश्छंदोभिः परिवृता मध्यं ह्येषामंगानामात्मा मध्यं छंदसां बृहती स हेश्वरो यशस्वी कल्याणकीर्त्तिर्भवितो
रीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह कृत्स्नो ह्येष आत्मा यद्बृहती तस्माद्बृहतीमेवाभिसंपादयेत् ॥
॥१७॥ तद्वा इदं बृहती सहस्रं संपन्नं तस्य वा एतस्य बृहतीसहस्रस्य संपन्नस्यैकादशानुष्टुभां शतानि
भवंति पंचविंशतिश्चानुष्टुभ आत्तं वै भूयसा कनीयस्तदुक्तमृषिणा वाचमष्टापदीमहमित्यष्टे हि
चतुरक्षराणि भवंति नवस्रक्तिमिति बृहती संपद्यमाना नवस्रक्तिरृतस्पृशमिति सत्यं वै वागृचा
स्पृष्टेंद्रात्परि तन्वं ममे इति तद्यदेवैतद्बृहतीसहस्रमनुष्टुप्संपन्नं भवति तस्मात्तदेंद्रात्प्राणाद्बृह
त्यैवाचमनुष्टुभं तन्वं संनिर्मिमीते स वा एष वाचः परमो विकारो यदेतन्महदुक्थं तदेतत्सं
चविधं मितममितं स्वरः सत्यानृते इत्यृग्गाथा कुंब्या तन्मितं यजुर्निगदो वृथा वाक्तदमितं
सामाथो यः कश्च गेष्णः स स्वर ओमिति सत्यं नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं स हेश्व

अर॰ द्वि॰ रोयन्नास्वीकल्याणकीर्त्तिर्भवितोः पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं तद्य
थावृक्ष आविर्मूलः शुष्यति स उद्वर्त्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्य
ति स उद्वर्त्तते तस्मादनृतं न वदेद्दयेत त्वेनेन पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत्किंचो
२५ मित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमोंकुर्याद्रिंच्याद्दात्मानं स कामेभ्यो नालं स्यादथैतत्पू
र्णमभ्यात्मं यन्नेति स यत्सर्वं नेति ब्रूयात्पापिकास्य कीर्त्तिर्जायेत सैनं तत्रैव हन्यात्तस्मात्
काल एव दद्यात्काले न दद्यात्तत्सत्यानृते मिथुनीकरोति तयोर्मिथुनात्प्रजायते भूयान्भव
ति यो वेतां वाचं वेद यस्या एष विकारः स सं प्रतिविदकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्य
ज्यमाना बह्वी नानारूपा भवति तस्यै यदुपांशु स प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तत्तिर इ
व तिर इव ह्यशरीरमशरीरो हि प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तदाविराविर्हि शरीरं ॥१८॥ २५

स

तद्यदिदं वृहती सहस्रं संपन्नं तद्यशाः स इंद्रः भूतानामधिपतिः स य एवमेतमिंद्रं भू
तानामधिपतिं वेद विस्रसा हैवास्माल्लोकात्प्रैतीति ह स्माह महिदास ऐतरेयः प्रेत्येंद्रो भू
त्वैषु लोकेषु राजति तदाहुर्यदनेन रूपेणामुं लोकमभिसंभवती३ अथ केन रूपेणेमं
लोकमाभवती३ तद्यदेतत्स्त्रियां लोहितं भवत्यग्नेस्तद्रूपं तस्मात्तस्मान्न बीभत्सेता
थ यदेतत्पुरुषे रेतो भवत्यादित्यस्य तद्रूपं तस्मात्तस्मान्न बीभत्सेत सोऽयमात्मेममात्मा
नममुष्मा आत्मने संप्रयच्छत्यसावात्मामुमात्मानमिमस्मा आत्मने संप्रयच्छति ताव
सं न्योन्यमभिनिष्पभवतोऽनेना ह रूपेणामुं लोकमभिसंभवत्यमुनो रूपेणेमं लोकमाभव
ति ॥१९॥ तत्रैते श्लोकाः ॥ यदक्षरं पंचविधं समेति युजो युक्ता अभि यत्संवहंति ॥
सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकं भवंति ॥ यदक्षरादक्षरमेति युक्तं युजे

अ॰ द्वि॰

२६

भुक्ता अभियत्तं स वहति॥ सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकं भवंति॥ यद्वाच ओ
मितियच्च नेति यच्चास्याः क्रूरं यदु चोल्बणि हुतद्विधूया कवयो अन्वविंदन्नामायत्तास
मतृप्यन्सुतेधि॥ यस्मिन्नामा समतृप्यन्सुतेधि तत्र देवाः सर्व युजो भवंति॥ तेन पाप्मान
मपहत्य ब्रह्मणा स्वर्गं लोकमप्येति विद्वान्॥ नैनं वाचा स्त्रियं ब्रुवं नैनमस्त्री पुमान्ब्रुवन्न
पुमांसं न ब्रुवन्नेनं वदन्वदति कश्चन॥ अः इति ब्रह्मन तत्रागतमहमिति तद्वा इदं बृहती सह
स्रं संपन्नं तस्य वा एतस्य बृहती सहस्रस्य संपन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि भ
वंति तावंति पुरुषायुषो ह्नां सहस्राणि भवंति जीवाक्षरेणैव जीवाहराप्नोति जीवाह्ना जीवाक्ष
रमित्येतन्न काममारोथ देवरथस्तस्य वागुद्धिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनः संग्रहीता तद
यं प्राणोधितिष्ठति तदुक्तमृषिणा तेन यातं मनसो जवीयसा निमिषश्चिज्जवीयसेति जवी

२६

यसेति॥ २०॥ ॥इति द्वितीयारण्यके तृतीयोध्यायः॥ ॥ आत्मा वा इदमेक एवाग्र आसीन्नान्य
त्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजत अंभो मरीचीर्मरमापो दोंभः परेण
दिवं द्यौः प्रतिष्ठांतरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपः स ईक्षतेमे नु लोका लोक
पालान्नु सृजा इति सोद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत्तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्य
त यथांडं मुखाद्वाग्वाचोग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभि
द्येतामक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निर
भिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चंद्र
मा नाभिर्निरभिद्यत नाभ्या अपानोपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः॥ २१॥
ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतंस्तमशनापिपासाभ्यामन्ववार्जत्ता एनमब्रुवन्नाय

ऐर॰२

तनंनः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति ताभ्यो गामानयत्ता अब्रुवन्न वै नोयमलमिति
ताभ्योश्वमानयत्ता अब्रुवन्न वै नोयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बतेति पुरुषो वा
व सुकृतं ता अब्रवीद्यथायतनं प्रविशतेति अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्रा

२७

विशदादित्यश्चक्षुर्भूत्वाक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि
भूत्वा त्वचं प्राविशंश्चंद्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा
शिश्नं प्राविशंस्तमशनापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति ते अब्रवीदेतास्वेव वां देवतास्व
भजाम्येतासु भागिन्यौ करोमीति तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशना
पिपासे भवतः ॥२२॥ स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति सोपोभ्यतपत्ताभ्योभि
तप्ताभ्यो मूर्तिरजायत या वै सा मूर्तिरजायतान्नं वै तत्तदेनत्सृष्टं पराङत्यजिघांसत्तद्वाचाजिघृक्षत्तन्ना
शक्नोद्वाचा ग्रहीतुं स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नो

२७

त्प्राणेन ग्रहीतुं स यद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषा
ग्रहीतुं स यद्धैनच्चक्षुषाग्रहैष्यत्दृष्ट्वा हैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुं स य
द्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचा ग्रहीतुं स यद्धैनत्त्वचाग्रहै
ष्यत्स्पृष्ट्वा हैवान्नमत्रप्स्यत्तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसा ग्रहीतुं स यद्धैनन्मनसाग्रहैष्यद्ध्यात्वा
हैवान्नमत्रप्स्यत्तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेन ग्रहीतुं स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्न
मत्रप्स्यत्तदपानेनाजिघृक्षत्तदावयत्सैषोन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः स ईक्षत कथं न्विदं म
दृते स्यादिति स ईक्षत कतरेण प्रपद्या इति स ईक्षत यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षु
षा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्ट
मथ कोहमिति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत सैषा विदृतिर्नाम द्वास्तदेतन्नांदनं तस्य त्र

आर०२ मस्यावसथास्त्रयः स्वप्नाअयमावसथोयमावसथोयमावसथइतिसजातोभूतान्यभिव्यैख्यत्कि
मिहान्यंवावदिषदितिसएतमेवपुरुषंब्रह्मततममपश्यदिदमदर्शमिती३ंतस्मादिदंद्रोनामेदंद्रो
२८ हवैनामतमिदंद्रंसंतमिंद्रइत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवाःपरोक्षप्रियाइवहिदेवाः॥
॥२३॥ ॥इतिद्वितीयारण्यकेचतुर्थोध्यायः॥ ॥अथकामंतुगर्भिण्यः॥ ॥पुरुषेहवाअयम
मादितोगर्भोभवतियदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेजः संभूतमात्मन्येवात्मानंबिभर्तितद्यदा
स्त्रियांसिंचत्यथैनज्जनयतितदस्यप्रथमंजन्मतत्स्त्रियाआत्मभूयंगच्छतियथास्वमंगंतथातस्मा
देनान्नहिनस्तिसास्यैतमात्मानमत्रगतंभावयतिसाभावयित्रीभावयितव्याभवतितंस्त्रीगर्भंबि २८
भर्तिसोग्रएवकुमारंजन्मनोग्रेधिभावयतिसयत्कुमारंजन्मनोग्रेधिभावयत्यात्मानमेवतद्भाव
यत्येषांलोकानांसंतत्याएवंसंतताहीमेलोकास्तदस्यद्वितीयंजन्मसोस्यायमात्मापुण्येभ्यःकर्म

भ्यःप्रतिधीयतेथास्यायमितरआत्माकृतकृत्योवयोगतःप्रैतिसइतःप्रयन्नेवपुन
र्जायतेतदस्यतृतीयंजन्मतदुक्तमृषिणागर्भेनुसन्नन्वेषामवेदमहंदेवानांजनिमानि
विश्वा॥शतंमापुरआयसीररक्षन्नधःश्येनोजवसानिरदीयमितिगर्भएवैतच्छयानोवा
मदेवएवमुवाचसएवंविद्वानस्माच्छरीरभेदादूर्ध्वउत्क्रम्यामुष्मिन्स्वर्गेलोकेसर्वान्कामाना
प्त्वामृतःसमभवत्समभवत्॥२४॥ ॥इतिद्वितीयारण्यकेपंचमोध्यायः॥ ॥यथास्थानंगर्भि तु
ण्यः॥कोयमात्मेतिवयमुपास्महेकतरःसआत्मायेनवापश्यतियेनवाशृणोतियेनवागंधा
वा नाजिघ्रतियेनवावाचंव्याकरोतियेनवास्वादुचास्वादुचविजानातियदेतद्धृदयंमनश्चैतत्संज्ञान
माज्ञानंविज्ञानंप्रज्ञानंमेधादृष्टिर्धृतिर्मतिर्मनीषाजूतिःस्मृतिःसंकल्पःक्रतुरसुःकामोवश
इतिसर्वाण्येवैतानिप्रज्ञानस्यनामधेयानिभवंत्येषब्रह्मैषइंद्रएषप्रजापतिरेतेसर्वेदेवाइ

अर॰२ मानि च पंच महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्रा
णीव बीजानीतराणि चेतराणि चांडजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा
गावः पुरुषा हस्तिनो यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञा
२९ ने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म स एतेन प्रज्ञेनात्मनास्माल्लोकादु
त्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वामृतः समभवत्समभवत् ॥२५॥ ॥इति द्वि
तीयारण्यके षष्ठोध्यायः॥ ॥वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावी
र्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेन॥ अहोरात्रान्संदधाम्यृतं व २९
दिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारं॥
॥२६॥ ॥ ॥इति द्वितीयारण्यके सप्तमोध्यायः॥ ॥इति द्वितीयारण्यकं समाप्तं॥ ॥

॥हरिः ओ३म्॥ ॥अथातः संहिताया उपनिषत्पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहि
तेति मांडूकेय आकाशः संहितेत्यस्य माक्षव्यो वेदयांचक्रे स हाविपरिहृतो मेने नेमस्य पुत्रे
ण समगोदिति समानं त्वेव तत्सरिहृतो मेने न हस्यागस्त्यः समानं त्वेतद्भवति वायुश्चाकाश
श्चेत्यधिदैवतमथाध्यात्मं वाक्पूर्वरूपं मन उत्तररूपं प्राणः संहितेति शूरवीरो मांडूकेयो
थ हास्य पुत्र आह ज्येष्ठो मनः पूर्वरूपं वागुत्तररूपं मनसा वा अग्रे संकल्पयत्यथ वाचा
व्याहरति तस्मान्मन एव पूर्वरूपं वागुत्तररूपं प्राणस्त्वेव संहितेति समानं मेनयोरपि
तु श्वपुत्रस्य च स एषोश्वरथः प्रष्टिवाहनो मनो वाक्प्राणसंहतः स य एवमेतां संहितां वे
द संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति नु मांडूके
यानां ॥१॥ अथ शाकल्यस्य पृथिवी पूर्वरूपं द्यौरुत्तररूपं वृष्टिः संधिः पर्जन्यः संधातेति

अर.२

३०

दुताप्रियमैत्रेतद्बल्लवदन्नह्रहन्त्संदधदहोरात्रेव पर्यतिद्यावापृथिव्योस्समधातामित्कृताप्या
कुतीरित्यधिदेवतमथाध्यात्मं पुरुषो ह वा अयं सर्व आ दद्वे विदलेभवत इत्याकुक्षस्य दमेव
पृथिव्या रूपमिदं दिवस्तत्रायमंतरेणाकाशो यथा सो द्यावापृथिव्यावंतरेणाकाशस्तस्मि
न्हास्मिन्नाकाशे प्राण आयत्तो यथामुष्मिन्नाकाशे वायुरायत्तो यथामूनि त्रीणि ज्योतींष्येव
मिमानि पुरुषे त्रीणि ज्योतींषि यथा सो दिव्यादित्य एवमिदं शिरसि चक्षुर्यथा सावंतरिक्षे विद्यु
देवमिदमात्मनि हृदयं यथायमग्निः पृथिव्यामेवमिदमुपस्थे रेत एवमु ह स्म सर्वलोकमा
त्मानमनुविधायोहेदमेव पृथिव्या रूपमिदं दिवः स य एवमेतां संहितां वेद संधीयते प्रजया
पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥ २ ॥ अथातो निर्भुज प्रवादाः पृथि
व्यायतनं निर्भुजं दिव्यायतनं प्रतृण्णमंतरिक्षायतनमुभयमंतरेणाथ यद्येनं निर्भुजं ब्रुवंतमुप

३०

य

वदेदच्योष्ठा वराभ्यां स्थानाभ्यामित्येनं ब्रूयादथ यद्येनं प्रतृण्णं ब्रुवंतमुपवदेदच्योष्ठा उत्तरा
भ्यां स्थानाभ्यामित्येनं ब्रूयाद्य स्त्वेवोभयमंतरेणाहत स्य नास्त्युपवादो यद्धि संधिं विवर्त्तय
तितन्निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्याग्र उ एवोभयमंतरे
णोभयं व्याप्तं भवत्यन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमंतरेणा
थ यद्येनं निर्भुजं ब्रुवंतं पर उपवदेत्पृथिवीं देवतामारः पृथिवी त्वा देवतारिष्यतीत्येनं ब्रूया
दथ यद्येनं प्रतृण्णं ब्रुवंतं पर उपवदेद्दिवं देवतामारो द्यौस्त्वा देवतारिष्यतीत्येनं ब्रूयादथ यद्ये
नमुभयमंतरेण ब्रुवंतं पर उपवदेदंतरिक्षं देवतामारोंतरिक्षं त्वा देवतारिष्यतीत्येनं ब्रूया
द्यथा तु कथा च ब्रुवन्वा ब्रुवंतं वा ब्रूयाद्भ्याशो ह मे व यत्तथा स्यान्नत्वेवाप्यकुशला द्ब्राह्मणं ब्रू
यादति ध्नन्न एव ब्राह्मणं ब्रूयान्नाति ध्नन्ने च न ब्राह्मणं ब्रूयान्नमो अस्तु ब्राह्मणेभ्य इति ह

स्माह शूरवीरो मांडुकेयः ॥३॥ अथातो नुव्याहाराः प्राणो वंश इति विद्यात्स य एनं प्राणं वंशमुपव
देच्छक्नुवंतं चेन्मन्येत प्राणं वंशं समधा३म् ॥ प्राणं मा वंशं संदधतं नशक्नोपीत्याह प्राणस्त्वा वं
शो हास्यतीत्येनं ब्रूयादथ चेदशक्नुवंतं मन्येत प्राणं वंशं समधिक्षिपं तं नाशकः संधातुं प्राण
स्त्वा वंशो हास्यतीत्येनं ब्रूयाद्यथा तु कथा च शक्नुवंतं वाशक्नुवंतं वा ब्रूयादध्याहारमेव यत्तथा स्यान्न त्वे
वान्यत्कुशला ब्राह्मणं ब्रूयादिति ह स्मान्य एव ब्राह्मणं ब्रूयान्नातिहन्येत च न ब्राह्मणं ब्रूयान्नमो अ
स्तु ब्राह्मणेभ्य इति ह स्माह शूरवीरो मांडुकेयः ॥४॥ अथ खल्वाहुर्निर्भुजवक्त्राः पूर्वमक्षरं
पूर्वरूपमुत्तरमुत्तररूपं यो वकाशः पूर्वरूपोत्तररूपे अंतरेण सा संहितेति स य एवमेतां संहितां
वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेत्यथ वयं क्रमो निर्भु
जवक्त्रा इति ह स्माह ह्रस्वो मांडूकेयः पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं यो वकाशः पूर्वरूपो

त्तररूपे अंतरेण येन संधिं विवर्तयति येन स्वरात्स्वरं विजानाति येन मात्रामात्रां विभजते सा
संहितेति स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोके
न सर्वमायुरेत्यथ हास्य पुत्र आह मध्यमः प्रातीबोधीपुत्रोक्षरे खल्विमे अविकर्षन्नेकोकुर्व
न्यथा वर्णमाह तद्यासौ मात्रा पूर्वरूपोत्तररूपे अंतरेण संधिविज्ञपनी साम तद्भवति सामैवाहं
संहितां मन्य इति तदप्येतदृषिणोक्तं बृहस्पतेन परः साम्नो विदुरिति स य एवमेतां संहितां वेद
संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥५॥ इह इत्थं तर
यो रूपेण संहिता संधीयत इति ता रूक्ष्यो वाग्वै रथंतरस्य रूपं प्राणो बृहत उभाभ्यामु खलु
संहिता संधीयते वाचा च प्राणेन चैतस्याह स्मो निषेधदि संवत्सरं गा रक्षयते ता रूक्ष्य एतस्याह
स्म मात्रायां संवत्सरं गा रक्षयते ता रूक्ष्यस्तदप्येतदृषिणोक्तं रथंतरमाजभारा वसिष्ठः ॥

अर॰ त॰

३२

भरद्वाजो बृहदा चक्रे अग्ने रिति स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्र
ह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति वाक्प्राणेन संहितेति कौंठरव्यः प्राणः पवमानेन पव
मानो विश्वैर्देवैर्विश्वे देवाः स्वर्गेण लोकेन स्वर्गो लोको ब्रह्मणा सैषावरपरा संहिता स यो हैता म
वरपरां संहितां वेदैवं हैव स प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन संधीयते यथै
षा संहिता स यदि परेण वोपस्रतः स्वेन वार्थेनाभिव्याहरेदभिव्याहार्षन्नेव विघाद्दिवं संहिता
गमद्विदुषां देवानामेवं भविष्यतीति शश्वत्तथा स्यात्स य एवमेतां संहितां वेद संधीयते प्रजया
पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति वाक्संहितेति पंचालचंडो वाचा वै
वेदाः संधीयंते वाचा छंदांसि वाचा मित्राणि संदधाति वाचा सर्वाणि भूतान्यथो वागेवेदं सर्व
मिति न यत्रैतदधीते वा भाषते वा वाचि तदा प्राणो भवति वाक्तदा प्राणं रेळ्हि अथ यत्र तूष्णीं वा

३२

स्वपिति वा प्राणे तदा वाग्भवति

वतिं प्राणस्तदा वाचं रेळ्हि तावन्योन्यं रीळ्हो वाग्वै माता प्राणः पुत्रस्तदप्येतदृषिणोक्तमेकः
सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे । तं पाकेन मनसापश्यमंतितस्तं माता रे

४

ळ्हि स उ रेळ्हि मातरमिति स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसे
न स्वर्गेण लोकेन सर्वमायुरेत्यथातः प्रजापतिसंहिता जाया पूर्वरूपं पतिरुत्तररूपं पुत्रः संधिः
प्रजननं संधानं सैषादितिः संहितादितिर्हीदं सर्वं यदिदं किंच पिता च माता च पुत्रश्च प्रजन
नं च तदप्येतदृषिणोक्तमदितिर्माता स पिता स पुत्र इति स य एवमेतां संहितां वेद संधीयते प्रज
या पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति सर्वमायुरेति ॥ ६ ॥ ॥ इति तृ
तीयारण्यके प्रथमोध्यायः ॥ ॥ प्राणो वंश इति स्थविरः शाकल्यस्तद्यथा शालावंशे सर्वेन्ये
वंशाः समाहिताः स्युरेवमस्मिन्प्राणे चक्षुः श्रोत्रं मनो वागिंद्रियाणि शरीरं सर्व आत्मा समाहि

अर॰ ८

३३

तस्तस्यैतस्यात्मनः प्राणऊष्मरूपमस्थीनि स्पर्शरूपं मज्जानः स्वररूपं मांसं लोहितमित्येतदन्यच्च
तुर्थमंतस्थारूपमिति ह स्माह ह्रस्वो माण्डूकेयस्त्रयं त्वेव न एतत्प्रोक्तं तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां
पर्वणामिति त्रीणि तः षष्टिशतानि त्रीणीतत्तानि सप्तविंशतिशतानि भवंति सप्त च वै शता
नि विंशतिश्च संवत्सरस्याहोरात्राः स एषोहः संमानश्चक्षुर्मयः श्रोत्रमयश्छंदोमयो मनोमयो
वाङ्मय आत्मा स य एवमेतमहः संमानं चक्षुर्मयं श्रोत्रमयं छंदोमयं मनोमयं वाङ्मयमात्मानं
वेदाह्नां सायुज्यं सरूपतां सलोकतामश्नुते पुत्री पशुमान्भवति सर्वमायुरेति ॥ ७ ॥ अथ कैंठरव्य
स्त्रीणि षष्टिशतान्यक्षराणां त्रीणि षष्टिशतान्यूष्मणां त्रीणि षष्टिशतानि संधीनां यान्यक्षराण्य
वोचामाहानि तानि यानूष्मणोवोचाम रात्रयस्ता यान्त्संधीनवोचामाहोरात्राणां ते संधय इत्यधि
दैवतमथाध्यात्मं यान्यक्षराण्यधिदैवतमवोचामास्थीनि तान्यध्यात्मं यानूष्मणोऽधिदैवतमवो

३३

भवत्यशीतिसहस्रं

चाम मज्जानस्तेऽध्यात्ममेष ह वै संप्रति प्राणो यन्मज्जैतद्रेतो न ह वा ऋते प्राणाद्रेतः सिच्यते
यद्वा ऋते प्राणाद्रेतः सिच्येत पूयेन्न संभवेद्यान्त्संधीनधिदैवतमवोचाम पर्वाणि तान्य
ध्यात्मं तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां पर्वणामिति पंचैतश्चत्वारिंशच्छतानि पंचैतस्त द
शीतिसहस्रं वा अर्कलिनो बृहतीरहरभिसंपादयंति स एषोक्षरः संमानश्चक्षुर्मयः श्रोत्र
मयश्छंदोमयो मनोमयो वाङ्मय आत्मा स य एवमेतमक्षरं संमानं चक्षुर्मयं श्रोत्रमयं
छंदोमयं मनोमयं वाङ्मयमात्मानं वेदाक्षराणां सायुज्यं सरूपतां सलोकतामश्नुते पुत्री
पशुमान्भवति सर्वमायुरेति ॥ ८ ॥ चत्वारः पुरुषा इति बाध्वः शरीरपुरुषश्छंदः पुरुषो वेद
पुरुषो महापुरुष इति शरीरपुरुष इति यमवो चाम स य एवायं दैहिक आत्मा तस्यैष योऽयम
शरीरः प्रज्ञात्मा स रसश्छंदःपुरुष इति यमवोचामाक्षरसमाम्नाय एव तस्यैतस्याकारो र

आर॰त॰

सोवेदपुरुषइतियमवोचामयेनवेदान्वेदऋग्वेदंयजुर्वेदंसामवेदंतस्यैतस्यब्रह्मारसस्त
स्माद्ब्रह्माणंब्रह्मिष्ठंकुर्वीतयोयज्ञस्योल्बणंपश्येन्महापुरुषइतियमवोचामसंवत्सरए
वप्रध्वंसयन्नन्यानिभूतान्येक्याभावयन्नन्यानितस्यैतस्यासावादित्योरसःसयश्चाय

३४

मशरीरःप्रज्ञात्मायश्चासावादित्यएकमेतदितिविद्यात्तस्मात्पुरुषंपुरुषंप्रत्यादित्योभवति
तदप्येतदृषिणोक्तंचित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः।आप्राद्यावापृथि
वीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्चेत्येतामनुविधांसंहितांसंधीयमानांमन्यइतिह
स्माहबाध्वएतंत्वेवबह्वृचामहत्युक्थेमीमांसंतएतमग्नावध्वर्यवएतंमहाव्रतेछंदोगाए

३४

तमस्यामेतंदिव्येतंवायावेतमाकाशएतमप्स्वेतमोषधीष्वेतंवनस्पतिष्वेतंचंद्रमस्येतंनक्षत्रेष्वे
तंसर्वेषुभूतेष्वेतमेवब्रह्मेत्याचक्षतेसएषसंवत्सरसंमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोम

नोमयोवाङ्मयआत्मासयएवमेतंसंवत्सरसंमानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवा
ङ्मयमात्मानंपरस्मैशंसति॥९॥दुग्धदोहाअस्यवेदाभवंतिनतस्यानूक्तेभागोस्तिनवेदसु
कृतस्यपंथानमितितदप्येतदृषिणोक्तंयस्तित्याजसचिविदंसखायंनतस्यवाच्यपिभा
गोअस्ति॥यदींशृणोत्यलकंशृणोतिनहिप्रवेदसुकृतस्यपंथामितिनतस्यानूक्तेभा
गोस्तिनवेदसुकृतस्यपंथानमित्येतत्तदुक्तंभवतितस्मादेवंविद्वान्नपरस्माअग्निंचि
नुयान्नपरस्मैमहाव्रतेनस्तुवीतनपरस्माएतदहःशंसेत्काममपित्रेवाचार्यायवाशंसे
दात्मनएवास्यतत्कृतंभवतिसयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्यएकमेत
दित्यवोचामतौयत्रविहीयेतेचंद्रमाइवादित्योदृश्यतेनरश्मयःप्रादुर्भवंतिलोहिनी
द्यौर्भवतियथामंजिष्ठाव्यस्तःपायुःकाककुलायगंधिकमस्यशिरोवासंपरेतोस्यात्मा यति

अर.ल.

३५

नचिरमिवजीविष्यतीतिविद्यात्सयत्करणीयंमन्येततत्कुर्वीतयदंतियच्चदूरकइतिसप्त
जपेदादित्यमलस्यरेतसइत्येकायत्रआत्मापवमानेतिषलुदूयंतमसस्परीत्येकाथापियत्र
छिद्रइवादित्योदृश्यतेरथनाभिरिवाभिख्यायेतछिद्रांवाछायांपश्येत्तदप्येवमेवविद्या
द्यथाप्यादर्शेवोदकेवाजिह्मशिरसंवाशिरसंवात्मानंपश्येद्विपर्यस्तेवाकन्याकेजिह्मेनवा
दृश्येयातांतदप्येवमेवविद्याद्यथाप्यपिधायाक्षिणीउपेक्षेतलद्यथाबटरकाणिसंपतंती
वदृश्यंतेतानियदानपश्येत्तदप्येवमेवविद्याद्यथाप्यपिधायकर्णाउपशृणुयात्सएषोग्ने
रिवप्रज्वलतोरथस्येवोपब्दिस्तंयदानशृणुयात्तदप्येवमेवविद्याद्यथापियत्रनीलइवा
ग्निर्दृश्यतेयथामयूरग्रीवामेघेवाविद्युतंपश्येन्मेघेवाविद्युतंनपश्येन्महामेघेवामरी
चीरिवपश्येततदप्येवमेवविद्याद्यथापियत्रभूमिंज्वलंतीमिवपश्येततदप्येवमेवविद्या

३५

दितिप्रत्यक्षदर्शनान्यथस्वप्नाः पुरुषंकृष्णंकृष्णदंतंपश्यतिसएनंहंतिवराहएनंहंतिमर्क
टएनमास्कंदयत्याशुवायुरेनंप्रवहतिसुवर्णंखादित्वापगिरतिमध्वश्नातिबिसानिभक्षयत्ये
कपुंडरीकंधारयतिखरैर्वराहैर्युक्तैर्यातिकृष्णांधेनुंकृष्णवत्सांनलमालीदक्षिणामुखोव्रा
जयतिसयद्येतेषांकिंचित्पश्येदुपोष्यपायसंस्थालीपाकंश्रपयित्वारात्रीसूक्तेनप्रत्यृचंहुत्वा
न्येनान्नेनब्राह्मणान्भोजयित्वाचरुंस्वयंप्राश्नीयात्सयोतोश्रुतोगतोमतोनतोदृष्टोविज्ञातोना
दिष्टः श्रोतामंताद्रष्टादेष्टाघोष्टाविज्ञाताप्रज्ञातासर्वेषांभूतानामंतरपुरुषः समआत्मेतिवि
द्यात्॥१०॥ अथखल्वियंसर्वस्यैवाचउपनिषत्सर्वाल्वेवेमाः सर्वस्यैवाचउपनिषदइमांत्वे
वाचक्षतेपृथिव्यारूपंस्पर्शाअंतरिक्षस्योष्माणोदिवः स्वराअग्नेरूपंस्पर्शावायोरूष्माणआ
दित्यस्यस्वराऋग्वेदस्यरूपंस्पर्शायजुर्वेदस्योष्माणः सामवेदस्यस्वराश्चक्षुषोरूपंस्पर्शाः

६

आर.त.

३६

श्रोत्रस्योष्माणो मनसः स्वराः प्राणस्य रूपं स्पर्शा अपानस्योष्माणो व्यानस्य स्वरा अथ खल्वि
यं दैवी वीणा भवति तदनुकृतिरसौ मानुषी वीणा भवति यथास्याः शिर एवममुष्याः शिरो यथा
स्या उदरमेवममुष्या अंभणं यथास्यै जिह्वैवममुष्यै वादनं यथास्यास्तंत्रय एवममुष्या अंगु
लयो यथास्याः स्वरा एवममुष्याः स्वरा यथास्याः स्पर्शा एवममुष्याः स्पर्शा यथा ह्येवेयं शब्दवती त
र्द्मवत्येवमसौ शब्दवती तर्द्मवती यथा ह्येवेयं लोमशेन चर्मणापिहिता भवत्येवमसौ लोमशेन च
र्मणापिहिता लोमशेन ह स्म वै चर्मणा पुरा वीणा अपिदधति स यो हैतां दैवीं वीणां वेद श्रुतवदनो
भवति भूमिप्रास्य कीर्तिर्भवति यत्र क्व चार्या वाचो भाषंते विदुरेनं तत्राथातो वाग्रसो यस्यां संसद्य
धीयानो वा भाषमाणो वा न विरुरुचुषेत तत्रैतामृचं जपेदोष्ठापिधाना नकुली दंतैः परिवृता पविः॥
सर्वस्यै वाच ईशाना चारु मामिह वादयेदिति वाग्रसः॥११॥ अथ हास्मा एतत् ह्रस्व हारितो वाग्ब्रा

३६

स्नणमित्येवोपोदाहरति प्रजापतिः प्रजाः सृष्ट्वा व्यस्रंसत संवत्सरः स छंदोभिरात्मानं समद
धाद्यच्छंदोभिरात्मानं समदधात्तस्मात्संहिता तस्यै वा एतस्यै संहितायै णकारो बलं षकारः
प्राण आत्मा स यो हैतौ णकारषकारावनुसंहितमृचो वेद सबलां सप्राणां संहितां वेदायुष्य
मिति विद्यात्स यदि विचिकित्सेत्सणकारं ब्रवाणी३ अणकारा३ इति सणकारमेव ब्रूया
त्सषकारं ब्रवाणी३ अषकारा३ इति सषकारमेव ब्रूयात्ते यद्वयमनुसंहितमृचोऽधीमहे

म

यच्च मांडूकेयीयमध्यायं प्रब्रूमस्तेन नो णकारषकारावुपाप्ताविति ह स्माह ह्रस्वो मांडूकेयो
ऽथ यद्वयमनुसंहितमृचोऽधीमहे यच्च मांडूकेयीयमध्यायं प्रब्रूमस्तेन नो णकारषका
रावुपाप्ताविति ह स्माह स्थविरः शाकल्य एतद्ध स्म वै तद्विद्वांस आहुरृषयः कावषेयाः कि
मर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे वाचि हि प्राणं जुहुमः प्राणे वा वाचं यो ह्ये

ना

अर॰च॰ वंप्रभवःसएवाप्ययस्ताएताःसंहितांनांतेवासिनेप्रब्रूयान्नासंवत्सरवासिनेनाप्रवक्तृ
इत्याचार्याआचार्याः॥१२॥ ॥इतितृतीयारण्यकेद्वितीयोध्यायः॥ ॥इतितृतीयारण्य
कंसमाप्तं॥ ॥ॐ॥ ॥विदामघवन्विदागातुमनुशंसिषोदिशः॥शिक्षाशचीनांपतेपू
३७ र्वीणांपुरूवसो॥आभिष्ट्वमभिष्टिभिःप्रचेतनप्रचेतय॥इंद्रद्युम्नायनइषएवाहिश
क्रः॥रायेवाजायवज्रिवःशविष्ठवज्रिन्नृंजसे॥मंहिष्ठवज्रिन्नृंजसआयाहिपिबम
त्स्व॥विदारायःसुवीर्यंभुवोवाजानांपतिर्वशाँअनु॥मंहिष्ठवज्रिन्नृंजसेयःशविष्ठःशू
राणां॥योमंहिष्ठोमघो नांचिकित्वोअभिनोनय॥इंद्रोविदेतमुस्तुषेवशीहिशक्रः॥ ३७
तमूतयेहवामहेजेतारमपराजितं॥सनःपर्षदतिद्विषःक्रतुश्छंदऋतंबृहत्॥इंद्रंधन
स्यसातयेहवामहेजेतारमपराजितं॥सनःपर्षदतिद्विषःसनःपर्षदतिस्रिधः॥पूर्वस्य

यत्तेअद्रिवःसुम्नआधेहिनोवसो॥पूर्तिःशविष्ठशस्यतईशेहिशक्रः॥नूनंतंनव्यंसन्यसेप्रभोज
नस्यवृत्रहन्॥समन्युषुब्रवावहैशूरोयोगोषुगच्छतिसखासुशेवोअद्वयाः॥एवाह्येवैवाह्यग्ना३
इ॥एवाह्येवैवाहींद्रा॥एवाह्येवैवाहिविष्णा३उ॥एवाह्येवैवाहिपूषन्॥एवाह्येवैवाहिदेवाः॥एवाहि
शक्रो वशीहिशक्रोवशाँअनु॥आयोमन्यायमन्यवउपोमन्यायमन्यवे॥उपेहिविश्वध॥विदामघ
वन्विदो३म्॥१॥ ॥इतिचतुर्थारण्यकेप्रथमोध्यायः॥ ॥इतिचतुर्थारण्यकंसमाप्तं॥ ॥
॥ॐ॥ ॥महाव्रतस्यपंचविंशतिंसामिधेन्यएकविंशतोवाग्रूपोत्तमायाःसमिधाग्निमितिच
तस्मैविश्वकर्मणऋषभउपालंभनीयउपांश्वाज्यप्रउगेविश्वजितोहोत्राश्चतुर्विंशादीस्वयंती
रप स्युवइतिचब्राह्मणाच्छंस्यावपेतप्रातःसवनेतीव्रस्याभिवयसोअस्यपाहीतिमाध्यंदिने
त्रिकद्रुकेषुमहिषोयवाशिरमितिस्तोत्रियंऐंद्र्यासुरूपनःपरावतइंद्रायहिद्यौरसुरोअनम्न

आर॰ पं॰

३८

त॥ आ घ स्मे पुरो रथमित्यतो नुरूपश्चतुर्विंशान्मरुत्वतीयस्याता नो ऽ सत्कमे जरितः साभिवेगः
पिबा सोममभियमुग्र तर्दः कया शुभा सवयसः सनीळा मरुत्वाँ इंद्र वृषभो रणाय॥ जनिष्ठा
उग्रः सहसे तुरायेति मरुत्वतीयं संस्थिते मरुत्वतीये होता विसंस्थित संचरेण निष्क्रम्या[illegible]
ध्रीयेति स्रग्त्राज्याकुती जुहोत्यौदुंबरेण स्रुवेणानु मामिंद्रो ऽनु मां बृहस्पतिरनु सोमो ऽनु अ
ग्निरावीत्॥ अनु मां मित्रावरुणाविहावतामनु द्यावापृथिवी पूर्वहूतौ॥ आदित्या मावि[illegible]
वंतु देवाः सप्त राजानो य उदाभिषिक्ताः॥ वायुः पूषा वरुणः सोमो अग्निः सूर्यो नक्ष[illegible]
हमानु॥ पितरो मा विश्वमिदं च भूतं पृश्निमातरो मरुतः स्वर्काः॥ ये अग्निजिह्वा उत वा यज
त्रास्ते नो देवाः सुहवाः शर्म यच्छंतेति दक्षिणे मार्जालीये देवा स्रुक्स्रुतं मां चतुर्गृहीतं पूर्वस्र
वदायोत्तरतोऽग्नेरुपनिधाय विहरणप्रभृति माध्यंदिने मार्जालीयो जागरितो भवतीति[illegible]

३८

न्परिवृते जुहोति प्राग्द्वारे वोदग्द्वारे वा प्रागुदग्द्वारे वाग्निरिवानाधृष्यः पृथिवी व स्रूपदा भू
यासमंतरिक्षमिवानाधृष्यो द्यौरिवानाधृष्यो भूयासं सूर्य इवाप्रतिधृष्यश्चंद्रमा इव पुनर्भू
यासं मन इवापूर्वं वायुरिव श्लोकभूर्भूयासमहरिव स्वं रात्रिरिव प्रियो भूयासं गाव इव पुन
र्भुवो मिथुनमिव मरीचयो भूयासमाप इव रसं ओषधय इव रूपं भूयासमन्नमिव विभु॥
यज्ञ इव प्रभुर्भूयासं ब्रह्मेव लोके क्षत्रमिव श्रियं भूयासं यदग्न एषा समितिर्भवाती यत्र
विभ्रजाथ वीथेति त्रीण्यनेन त्वचमत्र तिष्ठन्नादित्यमुपतिष्ठते पर्यावृत्ते प्रदक्षिणमावस्थे
तेऽश्वे वा स्वाहाकारे रेत्स्येवा ३॥ इदं मधु ३ इदं मधु॥ इमं ती ब्रस्रुतं पिबा ३॥ इदं मधु ३ इदं म
ध्विति च प्रेष्याः संस्रास्ति पूर्णकुंभा स्त्रियो वमाः षळुत्तमा इमं मध्विष्यमुदकुंभं चत्रिः प्रद
क्षिणं परिव्रजाथ दक्षिणैः पाणिभिर्दक्षिणानूरून्नाघ्नाना एत्स्येवा ३॥ इदं मधु ३ इदं मध्वि

अर॰पं॰

तिवदस्य॥१॥ उपाकृते स्तोत्रेऽग्नीध्रं निनयाथाग्नीत्तरेण मार्जालीयं त्रोषमंतर्वेदीति प्रदक्षिणमग्नि
निष्क्रम्याग्रेण यूपं पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्नग्नेः शिर उपतिष्ठते नमस्ते गायत्राय यत्ते शिर इ
तितेनैव यथेतं प्रत्येत्य दक्षिणमुदङ्मुखः पक्षं नमस्ते राथंतराय यस्ते दक्षिणः पक्ष इत्यपरेणा
ग्निं पुच्छमतिक्रम्य प्राङ्मुख उत्तरं नमस्ते बार्हताय यस्त उत्तरः पक्ष इति पश्चात्प्राङ् पुच्छं नमस्ते य
ज्ञायज्ञियाय यत्ते पुच्छं मा ते प्रतिष्ठेति दक्षिणतः पुच्छस्यात्मानं नमस्ते राजनाय यस्त आत्मेति॥२॥ अथै
तं सदः प्रसर्पति पुरस्तात्प्रेंख उपक्लृप्तो भवति स्थूणे रज्जू वीवध इत्येतत्प्रक्षाल्य तेनैन
प्रपाद्योत्तरेणाग्नीध्रीयं परिव्रज्य पूर्वया द्वारा सदः सर्वान्धिष्ण्याननूत्तरेणौदुंबराणि का
ष्ठानि प्रेंखस्य भवंति पालाशानि मिश्राणि वार्त्रीणि फलकान्युभयतस्तक्ष्णानि द्वे वास
न्यश्वतावस दूमुमात्रः प्राङ् प्रेंखो निमुष्टिकस्तिर्यङ् उदगग्रः प्राग्ग्राभ्यां सूचीभ्यां समु

३९

३९

तो दक्षिणोत्तरे स्थूणे निखायाभितो होतृषदनं वीवधमत्याधायास्यास्य संमितं कर्तुः कुशास्तच्छिद्रा
णि प्रेंखस्य भवंति रज्जूभ्यामूर्ध्वमुद्यति दक्षिणतो दक्षिणयोत्तरतः सव्यया दार्भ्ये त्रिगुणे स्या
तां सव्यदक्षिणे पंचव्यायामे द्विगुणे वीवधे त्रिः प्रदक्षिणं पर्यस्योर्ध्वं ग्रंथिं निष्कर्षं बध्नाति शा
खाभिर्हसीभिर्वा पर्यं पंत्यप्रकंपिन्चतुरंगुलेनेषविष्कम्भः प्रेंखः स्यान्मुष्टिमात्रेण वा दक्षिण
तउदाहिततरः समो वा पदमात्रेऽधिस्थ्यात्॥३॥ निष्ठिते प्रेंखे होतावाणमौदुंबरं त्रातंतं तु मु
भाभ्यां परिगृह्योत्तरत उपोहते यथा वीणां सप्तभिश्छंदोभिश्चतुरुत्तरैः स्थानान्यस्योर्ध्वमु
हृत्स्नीयादृग्राभिर्वा गायत्रेण त्वा छंदसा दूहाम्योस्मिहेन त्वाऽनुष्टुभेन त्वा बार्हतेन त्वा पांक्तेन
त्वा त्रैष्टुभेन त्वा जागतेन त्वा वैराजेन त्वा द्विपदेन त्वातिछंदसा त्वेति छंदस्यनुक्रम्य स्थानानामनु
परिक्रमणमौदुंबर्या ईषयाग्रा रवया सपलाशाया मूलदेशेन वाणं त्रिरूर्ध्वमुल्लिखति प्राणाय

अर.पं.

४०

त्वाऽपानाय त्वा व्यानाय त्वोल्लिखामीत्यन्येभ्योऽपि कामेभ्यः पुनरपि नत्वोल्लिखामीति ब्रूयाद्यथेनं स
र्पाख्वं छंदोगेभ्यः प्रयच्छति भक्षेभ्यस्त्वेति पश्चाद्वै फलके पाणी प्रतिष्ठापयति प्राणमनु प्रेंखस्वेति
प्राञ्चं प्रेंखं प्रणयति व्यानमनु वीखस्वेति तिर्यञ्चमपानमन्वीखस्वेत्यभ्यात्मं भूर्भुवः स्वरिति ज
पति प्राणाय त्वेति प्राञ्चमेव व्यानाय त्वेति तिर्यञ्चमपानाय त्वेत्यभ्यात्मं वसवस्त्वा गायत्रेण छंद
सारोहं तु तानन्वारोहामीति पश्चाद्वै फलकेऽरत्नी प्रतिष्ठापयत्यथ पूर्वफलकं नानापाणिभ्या
मभिपद्येत यथाहि स्त्रष्यन्मध्यमं कुबुके नोपस्पृशेदूर्ध्वो वा संधिं रुद्रास्त्वा त्रैष्टुभेन छंदसा
रोहं तु तानन्वारोहामीति दक्षिणं सक्थ्यतिहरत्यादित्यास्त्वा जागतेन छंदसारोहं तु तानन्वारोह
मीति सव्यं विश्वे त्वा देवा आनुष्टुभेन छंदसारोहं तु तानन्वारोहामीति समारोहति पश्चात्त्वस्य
धिष्ण्यस्य दक्षिणं पादं प्राञ्चं प्रतिष्ठापयत्यथ सव्यं यदेतरस्त्राम्येद्यथेतरं यदेतरो थेतरं नोभौ

४०

विपन्नमो कुर्यात्कूर्चान्होत्रकाः समारोहंति ब्रह्मा चौदुंबरीमासंदीमुद्गाता यदि कस्मैचिद्व
रयकर्म्मिणे जिगमिषेद्दाक्षिणत्यपालं प्राङ् वरुणस्य चरित्वा तमर्थमेवमेवाजपयात्रतारोहेत्॥
॥४॥ प्रस्तोतारं संशास्ति पंचविंशस्य स्तोमस्य तिसृषु द्वैतृतीयास्वद्रुत्रयोदशास्तु वा परिशि
ष्टासु प्रथमं प्रतिहारं प्रश्नूताद्विसु द्वैत्रयोदशासु प्रवाचयतेति जात्वृकर्ण्यः प्रोक्ते जपति स्तुप
र्णोसि गरुत्मान्॥ प्रेमां वाचं वदिष्यामि बहु वदिष्यंती बहु पतिष्यंती बहु करिष्यंती बहु सनि
ष्यंती बहोर्भूयः करिष्यंती स्वर्गच्छंती स्वर्वदिष्यंती स्वः पतिष्यंती स्वः करिष्यंती स्वः सनिष्यंती स्व
रिमं यज्ञं वक्ष्यंती स्वर्मा यजमानं वक्ष्यंतीमिति दीक्षिते यजमाने ब्राह्मणो नादीक्षिते स्वरमुमिति
योस्य प्रियः स्यान्न तु वक्ष्यंतीमिति ब्रूयादुक्थवीर्याणि च संप्राणो वाचा समहं वाचा संचक्षुर्म
नसा समहं मनसा संश्रोत्रमात्मना समहमात्मना मयि महान्मयि भर्गो मयि भगो मयि

आर.पं.

४१

भुजो मयि स्तोभो मयि स्तोमो मयि श्लोको मयि घोषो मयि यशो मयि श्रीर्मयि कीर्तिर्मयि भुक्ति
रित्याहूयवाणिति जपति त्रयस्त्राह्वावाः शस्त्रादेर्निविदः परिधानीयायाइति शस्त्रानध्वर्यवः कार
यंत्येतस्मिन्नहनि प्रभृतमन्नं दद्याद्राजपुत्रेण चर्मव्याधयंत्यार्घ्यातिभ्र मिदुंदुभिं पत्न्यश्च कांडवी
णाभृतानां चमैथुनं ब्रह्मचारिपुंश्चल्योः संप्रवादोनेकेन साम्ना निष्केवल्याय स्तुवते राजनं स्तो
त्रियेण प्रतिपद्यते॥५॥तदिदास भुवनेषु ज्येष्ठं तां स्तुते कीर्तिं मघवन्महित्वा भर यद्दूर वधेवीर्याय
न्वणामुत्वा नतमं गीर्भिरुक्थैरिति तिस्रो त्रहे के स्वादोः स्वादीयः स्वादुना सृजा समदः सुमधुमधु

४१

नाभियोधीरित्यात्मन एते पदे उदूह्य पक्षपदे प्रस्तवदध्यात्स्वभ्यायंतोम घवन्निंद्र वाजिनो गामश्वं
रथ्यमिंद्र संकिरेत्येते योश्वस्थान दूत रेश्रियमहगोरश्वं मात्मंधत्ते संपक्षयोः पतनायनदं व ओद
तीनामित्येत येतानि व्यतिषजति पादैः पदान्यहरती कारं नद्वं स्तुत्त्तराणि प्रथमायां च पुरुषाक्षरा

ण्युपदधाति पादे पादे कैकमवसाने तृतीयवर्जं स खलु विहरत्यपि निदर्शना यो दाहरिष्या
मः॥तदिदासभुवनेषु ज्येष्ठं पु॥नदंव ओदतीनां॥यतो जज्ञउग्रस्त्वेषनृम्णोह॥नदं यो
युवतीनां उम्॥सद्यो जज्ञानो निरिणाति शत्रूनपतिं वो अघ्यानां॥अनुयं विश्वे मदं त्यूमा
ष्वो धेनूनामिषुध्य सोउ भिस्येवमेतां त्रिरन्यास्तु चेत्समाम्नातास्तु राजनेन साम्ना स्तुवी
रन्नथास्थाने ताइहैवेमा अस्समाम्नातास्तु चेत्स्तुवीरन्समाम्नातस्य तावतीरुद्धृत्य तत्र
ताः शंसेदिहो एवे मा अन्यास्तु चेत् प्राकृ सूददोहस स्तास्तदिदा सेत्येतदादि शस्त्रमविहृत
श्चात्र प्रतिगरस्तान्यस्य सूददोहस इत्येतदादिः सूददोहाः सूददोहाः॥६॥ ॥इति पंचमार
ण्यके प्रथमोध्यायः॥ ॥श्री वायुः॥ मस्येदमार जस्तुजो युजो वनं सहः॥इंद्रस्य रंत्यं हृहत॥
नाधृषस्मा दधर्षदाधृषाणं धृषितं शवः॥पुरायदीमति व्यथिरिंद्रस्य धृषितं सहः॥सनोद

आर॰ पं

४२

दातुतं रयिं रयिं पिशंगसंदृशं ॥ इंद्रः पतिस्तवस्तमो जनेष्वा स्वर्दृदोहाः त्रिरो गायत्रमिंद्रमि
द्गाथिनो बृहदित्यन्यास्कन्चेत्समाम्नातास्कन्कवीरन्नुभयासंस्थानविपर्ययोऽ समाम्नाता
स्कन्चेत्स्कवीरन्निश्रास्कन्चेत्स्कन्कस्योत्तमां स्वर्दृदोहा विजव ॥ स्कत स्तेसोम उपमाहि यज्ञं म
त्वाम दंपुरुवारं मघाय ॥ मंहिष्ठ इंद्र विजुरो गणध्ये ॥ स साहतु र्वृत्रहत्येषु शत्रूनभुर्वि
गाह एषः ॥ स नो नेतारं महयाम इंद्रं ॥ इनो वस्कः स म जः पर्वतेष्ठाः प्रतिवाम ऋजीषी ॥ इंद्रः
शश्वद्भिर्जोहूत्र एवैः ॥ स्वर्दृदोहाइत्येतत्रयं ग्रीवाः शिरो विजवः सर्वमर्द्धर्च्ये ॥ ७ ॥ राथंतरो
दक्षिणः पक्षोऽभित्वाशूरनोनुमोऽभित्वापूर्वपीतयइतिरथंतरस्य स्तोत्रियानुरूपौ प्रगा
थो चतस्रः सतीः षड्बृहतीः करोतींद्रस्य नु वीर्याणि प्रवोचं ॥ त्वेह यस्ति तदश्विनाः इंद्रेति
पंचदशायस्तिग्मशृंगो वृषभो न भीम उग्रोजस्तेवीर्यायस्वधावानुद्भुरत्साणोमेरतश्च व

४२

स्यातेमहइंद्रोस्कग्रेतिपंचसूक्तान्यानइंद्रो दूरादानआसादितिसंपातइत्थाहिसोमइन्मद
इतिपंक्तिः स्वर्दृदोहाबार्हतउत्तरस्त्वामिद्धिहवामहेत्वंस्वोहिचेरवइतिबृहतः स्तोत्रियानु
रूपौ प्रगाथौ चतस्रः सतीः षड्बृहतीः करोतितमुष्टुहियोऽभिभूत्योजाः स्कतइत्त्वंनिमि
श्लइंद्रसोमइतित्रीण्यभूरेकोरयिपतेरयीणामित्यष्टौ सूक्तानि कथामहामवृधत्कस्य
होतुरितिसंपातइंद्रोमदायवावृधइतिपंक्तिः स्वर्दृदोहाराथंतरोदक्षिणः पक्षः पंचदशा
स्तोम एकत्रातंवसिष्ठप्रासाहोबार्हतउत्तरः सप्तदशास्तोमो द्विरात्रं भरद्वाज प्रासाहो भद्रंड्ढ
छंद्विपदास्विमानुकंभुवनासीषधामायाहिवनसासहेतिनवसमाम्नाताऽथासमाम्ना
ताः प्रवइंद्रायवृत्रहन्तमायविप्रागाथंगायतयज्जुजोषत ॥ अर्चंत्यर्कदेवताः स्वर्काऽत्रास्तो
भतिश्रुतोसुवासइंद्रः ॥ उपप्रक्षेमधुमतिक्षियंतः पुष्यंतोरयिंधीमहेतमिंद्र ॥ विश्वतोदाव

अ॰र॰पं॰

४३

न्विश्वतोन आभरयंत्वात्रा विष्ठमी महे॥ सस्कृप्रणीतेन्न तमः स्वराळसि मंहिष्ठोवाजसातये॥
त्वंत्येक ईशिषे सनाद मर्त्त्क ओजसा॥ विश्वस्य प्रस्तोभ विद्वान्न्पुरावायादि वेहासनूनं॥ इषंनो
मित्रावरुणा कर्त्तनेळांपीवरी मिषं कृणुहीन इंद्र॥ त्वंपदं मघं रयिषणिन सोमोत्र्य व्रतं हिनोति
न स्ए न्नाइन्याः॥ एष ब्रह्मेतितिस्र आ धूर्ष्वस्मा इत्येका स्सूदोहाय छावानेतिधाय्या स्सूदोहा॥
॥८॥ गायत्रीतृचात्रीतिर्महाँ इंद्रो य ओजसेतितिस्र उत्तमा उद्धरति पुरोळान्नंनो अंधस इति
तिस्र इंद्र इत्सोमपा एक इत्येतस्याष्टतीनां तिस्र उत्तमा उद्धरति तासां स्वादवः सोमा आयाहीत्ये
तामुद्धृत्यनस्यून्यं बळाकरमित्येतां प्रत्यवदधाति जज्ञानो नु शतक्रतुरित्येका पुरुहूतं पुरुष्टु
तमितितिस्र एषउह्लूदभिश्रुतामघमित्युत्तमामुद्धरति प्रकृतान्यृजीषिण आधाये अग्निमिंध
तआहृतन इंद्रक्षमंतमिति सूक्ते स्सूदोहा॥९॥ बार्हतीतृचात्रीतिर्मा चिदन्यद्विशंसतेत्येकया

४३

नत्रिंशत्रास्विवा सूक्तस्य रस्मिन इति विंशतेः सप्तमी चाष्टमी चोद्धरति यदिंद्र प्रागपागुदगिति चतुर्दश
वर्यंघत्वा सूक्तावंत इति पंचदशा मो षुत्वा वाघतश्चनेत्येतस्याद्विपदां चोद्धरति राथंतरं च प्रगाथ
मथहास्यनकिः सुदासो रथमित्येतं प्रगाथमुद्धृत्य त्वामिदाह्यो नर इत्येतं प्रगाथं प्रत्यवदधात्य
भिप्रवः सुराधसमिति षडूलरिवत्यानां स्सूक्तानि यः सत्राहा विचर्षणिरिति त्रिशोषोऽयं ते अस्तु
हर्यत इति सूक्ते उभयं शृणवच्च न इति सप्तमी चाष्टमी चोद्धरति तरोभिर्वो विदद्वसुमिति सू
त्तमामुद्धरति यो राजा चर्षणीनामित्येकादशा तं वो दस्ममृतीषहं मानो विश्वासु सुक्रतो आ
इंद्र भुज आभर इति नव स्सूदोहाः॥१०॥ अभिष्टिहीतृचात्रीतिर्य इंद्र सोमपातम इति
सूक्ते तम्वभिप्रगायतेत्युत्तमामुद्धरतींद्राय साम गायतेत्सरवाय आ त्रिषाम हीति
तिस्र उत्तमा उद्धरति य एक इद्विदयत आयास्य द्रिभिः सुतं यस्य त्यच्छं बरं मद इति त्र

आ.र.प.

४४

पस्तु चा गायत्र्यः संपद्यो ऽस्मिन्नहः सप्तसप्त गायत्र्यः षट् षळुष्णिहो भवंति ॥ यदिंद्राहं यथा त्वं
मसम्राजं चर्षणीनामिति सूक्ते उत्तरस्योत्तमे उद्धरति वार्त्रहत्याय त्वा वसइ स्कन्तमामु
द्धरतिस्क रूपकृत्नुमूतय इति त्रीण्येंद्रसानसिं रयिमिति सूक्ते यस्मान यसरावत इति
तिसृभ्ये उत्तमा उद्धरति रेवतीर्नः सधमाद इति तिसृभिः सूददोहा इत्येता स्तित्रस्तु चा त्री त
यः सर्वाभ्र ईर्व्याम्भ्रिन्नमत्रीतय उदरं वज्रास्त्वावतः पुरूवसविति वत्रः सनितः स्कसनि
तरित्येतद्दंतो दद्रीरेक्णइतिद्विपदा न्तूनमथेत्येकपदा ता अस्य सूददोहस इत्येतद्दंतः सूद
दोहाः सूददोहाः ॥११॥ ॥इति पंचमारण्यके द्वितीयोध्यायः॥ ॥ गुरू ३ ॥ इंद्राग्नी युवं
स्तुन इत्येतस्या ईर्चा न्नृगायत्रीकारमुत्तरमुत्तरस्यानुष्टुप्कारं प्रागुत्तमायाः प्रवो महे मं
दमानायांधस इति निविद्धानं वनेनवायो न्यधायि चाकन्नयो जात एव प्रथमो मनस्वानि

ति ते अंतरेणा याह्यर्वाङ् पवं धुरेष्ठाविधुं दद्राणं समनेबहूनामित्येतदावपनं द्वाती नामेंद्री
णां त्रिष्टुप् जगतीनां हृहतीसंपन्नानां यावतीरावपेरंस्तावत्स्यूर्ध्वमस्युषो वर्षाणिजिजीविषेद
संवत्सरात्संवत्सराद्द्वातोनवात्यमू षु वाजिनं देवजूतमिंद्रो विश्वं विराजतीत्येकपदे द्वे विश्वा
अवीवृधन्नित्यानुष्टुभं तस्य प्रथमायाः पूर्वमर्द्धर्चं शस्त्वोत्तरेणार्द्धर्चेनोत्तरस्याः पूर्वमर्द्धर्चं
व्यतिषजति पादैः पादाननुष्टुप्कारं प्रागुत्तमायाः पूर्वस्मात्पूर्वस्मादर्द्धर्चादुत्तरमुत्तरमर्द्धर्चं व्य
तिषजति प्रकृत्या त्रैष्टुभः पिबा सोममिंद्र मंदतु त्वेति षड्योनिष्ट इंद्र सदने अकारीत्येतस्य चतसृ
शस्त्वोत्तमामुपसंतत्योपोत्तमया परिदधाति परिहित उक्थ उक्थसंपदं जपत्युक्थवीर्यस्य स्था
न उक्थ्यदोहः ॥१२॥ भूर्द्धुलोकानामस्मि ॥ वाचोरसस्तेजः प्राणस्यायतनं मनसः संवेत्राश्चक्षुषः
संभवः श्रोत्रस्य प्रतिष्ठा हृदयस्य सर्वं ॥ इंद्रः कर्माक्षितममृतं व्योम ॥ ऋतं सत्यं विजिग्यानं विवा

आर. पं.

४५

चन मंतो वाचो विभुः सर्वस्मादुत्तरं ज्योतिरूधर प्रतिवादः पूर्वं सर्वं वाक् परागर्वाक् सधु सलिलं
धेनुपिन्वति ॥ चक्षुः श्रोत्रं प्राणः सत्यसंमितं वाक् प्रभृतं मनसो विभृतं ॥ हृदयोग्रं ब्राह्मणभ
र्तमन्नशुभेवर्षपवित्रं गोभगं पृथिव्युपरं वरुणवच्छितमंतपस्तन्विंद्रज्येष्ठं सहस्रधारम
युताक्षरमम्रतं दुहाने ॥ एतास्तउक्थभृतयएतावाचोविभृतयः ॥ ताभिर्मइहधुक्ष्वामृत
स्यश्रियं महीं ॥ प्रजापतिरिदं ब्रह्मवेदानां ससृजे रसं ॥ तेनाहं विश्वमाप्यासं सर्वान्कामांदु
हां महत् ॥ भूर्भुवः स्वस्त्रयो वेदोसि ॥ ब्रह्म प्रजां मे धुक्ष्व ॥ आयुः प्राणं मे धुक्ष्व ॥ पशून्वित्तं मे
धुक्ष्व ॥ श्रियं यशो मे धुक्ष्व ॥ लोकं ब्रह्मवर्चसमभयं यज्ञसमृद्धिं मे धुक्ष्वेति वाचयत्यध्व
र्युमिबुद्धं वेदस्यभवत्सोमुक्थशस्त्रायजसोमस्येतीज्यायेसंप्रेषितो येस्यजामहइत्याग्र्यनि
त्ययेवयजतिव्यवान्येवानुवषट्करोत्युक्तेवषट्कारानुमंत्रणमाहरत्यध्वर्युरुक्थपात्र

४५

मतिग्राह्यॉंश्चमसाँश्चभक्षं प्रतिख्यायहोताप्राङ् प्रेंखादवरोहत्यथैतं प्रेंखंप्रत्यंचमवबध्नं
तियथा त्रासितारं भक्षयिष्यंतं नोपहनिष्यसीति प्रेंखस्यस्यायतन आसीनो होता भक्षयत्य
थैतदुक्थपात्रं होतोपस्टष्टेन जपेन भक्षयति ॥ वाग्देवी सोमस्य तृप्यतु ॥ सोमो मे राजायुः प्रा
णायवर्षतु ॥ स मे प्राणः सर्वमायुर्दुहां महदित्यत्तमाद्दाभिप्लविकात्तृतीयसवनमन्यद्वैश्व
देवाग्निविद्वानादस्यवामस्यपलितस्यहोतुरितिसलिलस्यैदेर्घतमसएकचत्वारिंशात
मानोभद्रीयं च तस्य स्थाने एकाहिको वैश्वदेवस्य प्रतिपदनुचरौ च्यवेतवेघज्ञायज्ञीयम
ग्नेतवश्रवोवयइतिषट् स्तोत्रियानुरूपौ यदीळांदध्यसीपु चेत्युक्तवीरन्नाग्निं न स्वरृक्ति
भिरितितावतीरनुरूपः संपन्नं महाव्रतं संतिष्ठत इदमहरग्निष्टोमो यथाकालमवभृथं
प्रेंखं हरेयुः संदहेयुर्व्हसीः ॥१३॥ नादीक्षितो महाव्रतं शंसेन्नानग्नौ न परस्मै नासंव

अर.पं.

४६

त्सरइत्येके कामं पित्रे वाचार्याय वा ब्रूयात्सह्यात्मनो हैवास्य तच्छस्तं भवति होत्रा त्रास्त्रैष्टुब्थ
न्नाय जसोमस्येत्येके प्रैषः सनाराशंसेषु नाराशंसेषु वा होत्रकाणामुक्थन्नाय जसोमाना
मितितद्दिदं महन्नानंतेवासिने प्रब्रूयान्नासंवत्सरवासिने नो एवासंवत्सरवासिने नाब्रह्म
चारिणे नासब्रह्मचारिणे नो एवासब्रह्मचारिणे नानभिप्राप्तायेतं देवं नेभूयः सकृद्द
ना द्विर्गदनाद्वा द्व्येव एक एकस्मै प्रब्रूयादिति ह स्माह जातूकर्ण्यो नवत्से चनत्तीय
इति नतिष्ठंस्तिष्ठते न ब्रजन्न्रजते न शयानः शयानायनोपर्यासीन उपर्यासीनाया
ध एवासीनोधस्तासीनाय नावष्टब्धो नप तिष्टब्धो नातिवीतो नांकं कृत्वोर्ध्वज्ञुरन पश्रि
तोधीयीत न मांसं भुक्त्वा न लोहितं दृष्ट्वा न गतासुं नाव्रत्यमाक्रम्य नाक्त्वा नाभ्यज्य नोन्मर्द
नं कारयित्वा न नापितेन कारयित्वा न स्नात्वा न वर्णकेनानुलिप्य न स्रजमपिनह्य न स्त्रियमु

४६

पगम्य नो लिखित्वा नावलिख्य नेदमेकस्मिन्नहनि समापयेदिति ह स्माह जातूकर्ण्यः समाप
येदिति गालवो यदन्यत् प्राकृत्वाशीतिभ्यः समापयेदेवेत्याग्निवेश्यायनोऽन्यमन्यस्मिन्देशे
ऽमयमान इति मन्त्रेदमधीयीत न तत्रान्यदधीयीत यत्रत्वन्यदधीयीत काममिदं तत्राधी
यीत नेदमनधीयन्स्नातको भवति यद्यप्यन्यद्बह्वधीयानो नेवेदमनधीयन्स्नातको भवति
नास्मादधीतात्प्रमाद्येद्यद्यप्यन्यस्मात्प्रमाद्येन्नैवास्मात्प्रमाद्येन्नो एवास्मात्प्रमाद्येदस्मा
च्चेत्प्रमाद्येदलमात्मन इति विद्यादलं सत्यं विद्यान्नेदं विदन्निदं विदा समुद्दिश्य सह भुंजी
त न सधमादी स्यादथातः स्वाध्यायधर्मं व्याख्यास्याम उपपुराणेनापीते कक्षोदके पूर्वाह्णेन
संभिन्नास्कन्नायास्वपराह्णेनाप्यूर्ध्वं मेघेऽपतत्यैव वर्षेत्त्रिरात्रं वैदिकेनाध्यायेनांतरियात्प्रास्मि
न्कथां वदेत नास्य रात्रौ चन च कीर्तयेषेन्तदिति वा एतस्य महतोभ्रस्य नाम भवति यो स्येतद

अर॰पं॰

४७

वंनामवेदब्रह्मभवतिब्रह्मभवति॥१४॥ ॥इत्यैतरेयपंचमारण्यकेतृतीयोध्यायः॥ ॥ ॥
॥इत्यैतरेयपंचमारण्यकंसमाप्तं॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥शुभंभवतु॥ ॥
॥उदितःशुक्रियंदधे॥तमहमात्मनिदधे॥अनुमामेत्विंद्रियं॥मयिश्रीर्मयियशः॥सर्वःस
प्राणःसबलः॥उत्तिष्ठाम्यनुमाश्रीः॥उत्तिष्ठत्वनुमायंतुदेवताः॥अदब्धंचक्षुरिषितंमनः॥
सूर्योज्योतिषांश्रेष्ठो दीक्षेमामाहिंसीः॥तच्चक्षुर्देवहितम्‌ऋ॰१॥त्वमग्नेव्रतपाअसि॰ऋ॰१
॥वाङ्मेमनसिप्रतिष्ठितामनोमेवाचिप्रतिष्ठितमाविरावीर्मएधिवेदस्यआणीस्थःश्रु
तंमेमाप्रहासीरनेनाधीतेन॥अहोरात्रान्संदधाम्यृतंवदिष्यामिसत्यंवदिष्यामितन्
मामवतुतद्वक्तारमवत्ववतुमामवतुवक्तारमवतुवक्तारं॥ओंशांतिःशांतिःशांतिः॥ ॥
शंनोमित्रःशंवरुणः॰ऋ॰१॥शांतापृथिवीशिवमंतरिक्षं॰॥भद्रंनोअपिवातयमनः॥ ॥

५०

अर॰

४८

॥संवत्१८४४कालयुक्तनामसंवत्सरेमार्गशीर्षशुद्ध१३त्रयोदशीतद्दिनेभडकंबकरोपना
मकचिंतामणिदीक्षितेनकाश्यांविश्वेश्वरसंनिधौलिखितंस्वार्थपरोपकार्थंच॥ ॥
॥भडकंबकरोपनामकपांडुरंगदीक्षितस्येदंपुस्तकं॥ ॥अर्जितंभूरिकष्टेनपुस्तकं
लिखितंमया॥हर्तुमिच्छतियःपापीतस्यवंशःक्षयोभवेत्॥ ॥१॥ ॥ ॥ ॥

॥इत्यारण्यकः समाप्ता॥

[OrderDescription]
,CREATED=19.08.19 12:41
,TRANSFERRED=2019/08/19 at 12:56:57
,PAGES=51
,TYPE=STD
,NAME=S0001497
,Book Name=M-714-ETREY AARNAYAK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF

FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,